CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S. D. P. B

Coll. No. 158

Title Tripathagā

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 158 Subject : Grammar

Title : Tripathagā on Paribhāṣenduśekhara

Author : Rāghavendrācārya Scribe : [illegible]

Date of the work : — Date of the Ms. : —

Place of the work : Place of the Ms. :

Size : 10.2" x 4.1" Extent : 50 foll.

Language : Sanskrit Script : Devanāgarī

Remarks : Complete

 श्रीगणेशायनमः॥श्रीरामचंद्रोविजयते॥वितन्यतेत्रिपथगाविष्णुपादाब्जसंगिनी॥सागरस्यप्रियाचेंदुशेखरांकविहारिणी॥नागेशाइति॥
आत्मनामेतिनिषेधोनामविशेषविषयइतिकेचित्॥सुखमनायासः।आयासेनभाष्यादितोपिबोधसंभवात्॥प्राचीनेति।पाणिनेःज्ञापकन्यायसि
द्धानीतिएषक्कोटिः।अनेनपरिभाषासूत्रव्युदासः।भाष्येति।इदंद्वयोर्विशेषणं।अनेनत्रिपाद्यामेत्यादिव्युदासःपरितोव्याप्तांभाषांपरिभाषांप्रचक्ष
तेइतिकारिकायां।लिंगवत्वेसतिफलवत्वंपरिभाषात्वमित्यपिकेचित्।संज्ञाशास्त्रान्यत्वेसतिविध्यपेक्षितार्थप्रतिविधायकत्वंसंज्ञाचपरिभा
षाचेत्यभियुक्तोक्तेः।अतिदेशस्यपृथगुपादानंब्राह्मणवसिष्ठन्यायेनेतिपरे।केचित्त्विति।यथोद्देशपक्षइतिशेषः।ननूभयत्राप्येकवाक्यताविशेषे
कोनयोर्भेदः।नचस्वदेशएकवाक्यतयाएकत्रापरत्रचविधिदेश।इतिभेदःफलभेदाभावेएतस्याकिंचित्करत्वात्।तदुक्तंततःफलभेदमाह।त्रिपाद्यामपीति
त्रैपादिकेनविधिनास्वसंस्कारायपरिभाषोपस्थानात्।अष्टत्वमपिशाब्दस्यावेशदर्शनात्।पक्षद्वयसाधारणमिति।अविशेषेणप्रवृत्तिरितिभावः।प्रदेशे
कवाक्यतायाइति।सर्वशास्त्राभिज्ञजनंचैकवाक्यतयासंस्कारकत्वमितिभावः।इदंचिंत्यं।संस्कारमात्रस्यैवज्ञानजन्यशाब्दार्थत्वेबाधकाभावेनैकवाक्यतये १

तिनिवेशेमानाभावात्।स्वदेशेगृहीतवाक्यार्थस्यतत्रविधौस्मृतिमात्रेणतत्संस्काराभिप्रायेणएकदेशइत्युक्तिःस्वबुद्धिजननद्वारेतितदुपपादनंचै
कवाक्यतायांनानुकूलं।कार्यकालपक्षेतेनाप्येवमेववक्तव्यत्वात्।नहितत्रापिकार्यकालपक्षेपरिभाषाणांस्वदेशेवाक्यार्थाभावः।बाधकाभावात्।एता
वानिति।इदमपिचिंत्यं।यथोद्देशेपिविधिदेशेपरिभाषाणांकार्यकालेचपरिभाषादेशेचविधेरुपस्थानाविशेषात्।अन्यथाकृतेतिकैयटोक्तादविशेषा
त्।परिभाषादेशाइति।तत्रैवचेत्यर्थः।परिकल्प्येति।एकवाक्यताभवतीत्यर्थेनसमानकर्तृकत्वाभावात्क्त्वानयुक्तः।विधिप्रदेशाइति।तत्रैवचेत्यर्थः।
अधिकार्यदेशेविधिशास्त्रस्यद्वितीयेपरिभाषायाःस्वदेशेपृथग्वाक्यार्थोबोध्यः।वारयतीति।स्वदेशपृथक्वाक्यार्थबोधकत्वमेकदेशस्थत्वंतं
त्रमितिभावः।उक्तपक्षद्वयस्यसंज्ञापरिभाषामात्रविषयत्वेक्ङितिचेतिनिषेधसूत्रेकार्यकालपक्षोनसंयोगइत्यतआह।निषेधेति।तत्रप्रथमां
तान्यसमभिव्याहृतासमस्तनञोनपर्युदासार्थत्वं।इतरस्याभूतनञ्घटोनेत्यतोभूतत्वमिन्नघटइतिबोधापत्तिरित्यतआह।प्रसज्येति।सहयुगप
त्।नतुपृथगिति।संज्ञाशास्त्रार्थबोधंविनाविधिवाक्यार्थबोधमात्रस्याप्यलाभेनात्याकांक्षितत्वान्नस्वदेशेवाक्यार्थइत्यर्थः।संज्ञाशास्त्रस्यत्विति।व
क्ष्यमाणविशेषानुपयोगाच्च।संस्कार्यविधीनामनेकत्वेनयुगपच्छ्रोतृबुद्ध्यनारोहेणतावतामुपस्थानासंभवाच्च।प्रधानेनगुणापकर्षणोपिगुणेनप्र

२ धान्याकर्षणस्यायुक्तत्वाच्च।नहिप्रयाजादिवाक्यैःपौर्णमासवाक्यमाकृष्यते।किंतिचेतिसूत्रस्थकैयटस्तुएकदेशिपक्षाशापवर्णनायप्रयत्नः।इत
एवारुच्याथवेतिपक्षांतरमुपन्यस्तमितिदिक्॥ननुशास्त्रासिद्धत्वपक्षेस्वदेशेवाक्यार्थबोधाभावेपिसंज्ञाशास्त्रदृष्ट्याकृतोमुख्यत्वंनासिद्धमित्यतआ
ह।कार्यार्थत्वपेति।कार्यज्ञानंचेति।प्रगृह्यसंज्ञारूपकार्यज्ञानंचेत्यर्थः।तद्देशस्यत्वस्येतिपाठः।स्वदेशास्थत्वस्येत्यर्थः।असिद्धत्वादभावात्।तद्दे
शास्थस्येतिपाठस्तुनयुक्तः।असिद्धत्वोपपादनवैयर्थ्यात्॥ननुपदसंज्ञाविषयेयथोद्देशपक्षस्यैवांगीकारेनिपाद्यामप्यप्रवृत्त्यापत्तिरित्यतआ
ह।पदादाविति।असिद्धत्वस्यकार्यार्थतयासंज्ञाशास्त्रदृष्ट्यावाक्यार्थबोधात्पूर्वंतत्प्रदेशास्थस्यनासिद्धत्वं।तदुत्तरंतस्यासिद्धत्वेपिफलाभावइति
भावः।आहुरिति।अत्रारुचिबीजंतुसंज्ञापरिभाषयोःकार्यकालपक्षेस्वदेशास्थता।विधिप्रदेशास्थताच।यद्यपदार्थोपस्थितौस्वदेशेपितयोर्वाक्या
र्थबोधेबाधकाभावात्।अतएवक्ङितिचेतिसूत्रेकार्यकालपक्षेतस्यांगाधिकारस्थतास्थताभाष्यउक्ता।तत्रविधिप्रदेशस्थत्वेनपौर्वापर्यमुक्तं।विरोध
प्रतिसंधानादेस्तत्रैवसंभवात्।तदभावेपाठक्रमतमपि।किंचभादिसंज्ञाविषयेयथोद्देशपक्षस्यैवांगीकारेकार्यकालंसंज्ञापरिभाषंभस्येत्यपस्थित
मिदंभवतियचिभमितिभाष्योक्तंसंगच्छते।ननुरामाविल्मादौद्रुतिवक्ष्यमाणंचविरुध्यते।तथाचकार्यकालपक्षेसंज्ञाशास्त्राणांस्वदेशपरि २
अन्यथापूष्णद्इत्यादौनलोपणत्वयोरापत्त्यनापत्तिभ्यांतदसंगतेः। २

त्यागेनपरिभाषाशास्त्राणांइत्यर्थः।नरत्तीयंहेयमितिभावः।कल्प्यतइति।कज्जविजक्षेपइतिचौरादिकस्येदं।चिक्लिन्नेत्ति।तदधीनप्रवृत्तिकेत्य
र्थः।यस्तुतस्तुकार्यकालोपस्येति।कार्यस्यकालोपस्येतिवाबहुव्रीहिः।कार्यकालंसंज्ञापरिभाषंयत्रकार्यंतत्रोपस्थितमिदंदूष्यंइतितत्पैवभाष्य
स्वरसात्।तथोद्देशेपरिभाषाणांस्वदेशेविधेराक्षेपाविशेषेणोक्तार्थस्यासंगतत्वाच्च।तस्मात्कार्यकालमित्यस्यचोक्तएवार्थः।अत्रचतयोःकार्यदेश
स्थत्वंइतिमुख्यमेव।तथाचयथोद्देशेस्वदेशेचोपस्थितातवाक्यार्थस्यप्रदेशेस्मरणमात्रंकार्यकालेतुप्रदेशेवाक्यैकवाक्यत्वेनेतिविशेषः।नवेति।यद्यपितद्देशास्थ
त्वंपारयतीत्यस्मिन्ननुच्छेकोसिनिस्तथापिस्वसमीपंप्राप्यतदूत्कस्यानित्यात्।शिथिलीकृतस्यतस्यदृढीकरणायेयंशंकेतिनदोषः।विधिनाथवाक्यैकवाक्यतया
स्वदेशंविहाययत्रचोद्देशीतत्रागमनाद्धाप्रदेशेस्मदे।नद्योनांस्वदेशजननाद्धास्वदेशत्यागः।नाद्यइत्याह।नहीति।पक्षद्वयेपीति।प्रदेशेषुविधिवाक्यविषयेस्व
बुद्धिजननेनैकवाक्यतयाविधिवाक्यैकत्ववाक्यतायाःपक्षद्वयेप्यविशेषादित्यर्थः।नद्वितीयइत्याह।नहीति।नतृतीयइत्याह।नापीति।प्रदेशाएववाक्यैक
वाक्यतयेत्यर्थः।नतद्देशएववाक्यार्थबोधःस्वदेशत्यागेहेतुः।नउततद्देशएवैकवाक्यतानुमयोनकत्वादितिभावः।अतएवेति।प्रदेशाएवैकवाक्यतायाःस्वदेः
प्रयोजकत्वादित्यर्थः।अन्यथेति।तत्रस्वबुद्धिजननमात्रेणतद्देशास्थत्वेइत्यर्थः।वस्तुतस्तुसूक्तरीत्यासंज्ञापरिभाषयोःकार्यकालपक्षेप्रदेशास्थत्वमपितयोरस

३ ऽपि केवलं कार्यपारतंत्र्यात्।एकदेशस्थस्य सर्वत्राभिव्यापकत्वं तु यथोद्देशपक्षाभिप्रायेण पाणिनिपाठाभिप्रायेण च।यथोद्देशे च तयोः स्वदेशे
कार्यैकवाक्यत्वेपि प्रधानानुगुण्येनैव गुणादेशाकस्य नागुणानुरोधेन प्रधानशास्त्रस्य तद्देशस्थत्वकल्पना।कार्यकालशब्दोप्यत्र वस्तारस्तिकइतिदिक्।
अनुबंधा अनेकांताः।विधेयानवयवाः।विधेयैकदेशत्वानुपलंभादिति।अनुमाने व्यतिरेकव्याप्तिमाह यो हीति।विधेय इति।अनुबंधविनिर्मुक्तपदार्थोप
स्थितेरिति भावः।यद्वा बोधकानवयवत्वमेव साध्यं न च हेत्वसंगतिः।बोधकावयवत्वे बोध्यत्वविधेयत्वयोरपि सानुबंधके त्वस्य स्वरूपमिति शास्त्रेण प्राप्तेः।के
चित्तूक्तानुमानेन बोधकानवयवत्वमेव साध्यं।बोध्यबोधकयोरभेदाभिप्रायेण चायं हेतुरिति वदंति।अवयवत्वारोपेणेति।सामीप्ये बहुव्रीह्युक्तेनभिधाना
दिति भावः।शिदादि पदमित्संज्ञकः शकारादिर्यस्य समर्पितबोध्यपरं व्याख्यानं तद्दृष्टि।दृष्टचक्षकारेणांत्यत्वप्रयुक्ते संज्ञाभाजां पूर्वोपकारकत्वे।शादित्व
प्रयुक्ते संज्ञाभाजां।परोपकारकत्वमिति अवस्था।अत्र संज्ञांत्यत्वप्रयुक्ताः चचादित्वप्रयुक्तेतिनु व्याख्यानतो निर्णयं।एकांतत्वेपि पूर्वस्य परस्यावयवइ
त्यत्र तत्रापि व्याख्यानमेव शरणमिति तात्पर्यं।परसमीपे कर्मधारयः एकांता इति।बोधकस्येति शेषः।तथा चानुबंधाः बोधकावयवाः।बोधके येन संबं
धेनोपलभ्यंते तेनान्यत्रानुपलभ्यमानत्वात्।णितीत्यादीनां तद्बोध्य इत्यर्थः।उक्तानुमाने न विधेयानवयवत्वसाधने सिद्धसाधनं।कल्प्यांतरे तु दृष्टं ३

त्वाज्लोपाभ्यामपहारेण सानुबंधस्याविधेयत्वोपपत्तेः अप्रयोजको हेतुः अवत्वं त्यशब्दादौ लक्षणानाश्रयणमेव लाघवमनुकूलस्तर्कस्तदिदमुक्तं।
एवं हीत्यादिना।बोध्यबोधकयोरभेदाभिप्रायेणोक्तो हेतुरिति मते तु विधेयतादशायां तत्रानुपलंभेपि उच्चारणदशायां तत्रोपलंभादवयवत्वोपपत्तेरु
क्तहेतुरप्रयोजकः।एतेन सत्प्रतिपक्षितस्याप्यसिद्धेरित्येव न्याय्यमित्यसंगतमित्यपास्तं।काद्देरिति।ददातीति सूत्रे विभाषाग्रहणेन णशेरित्संज्ञाज्ञापनेन
तयोरत्यागइतिकेचित्।इदं चिंत्यं।अंत्यशब्दवदादिशब्देपि लक्षणयैवोपपत्तेः किंचहलंतमित्येतच्छास्त्रविषयेऽनुबंधविनिर्मुक्तोपस्थितेरप्रामाणिकत्वेन
विधेयैकदेशादर्शनादिष्वनेकांतत्वसाधकत्वहेतोस्तत्राभावेन णादेरेकांतत्वमेवाकेचित्तु नानुबंधकृतमित्यादि परिभाषा व्याकरणप्रयुक्तलाघवानुरो
धेनानेकांता इत्येव युक्तमिति वदंति।नानुबंधकृतमनेकाल्त्वम्।एकांतत्वमिति।विधौ निर्दिष्टो यो नेकाल् स सर्वस्येति सूत्रार्थः।तेनानुबंधविनिर्मुक्तप
दार्थोपस्थितावपि न दोषः।लोपोयीति।प्रकृते पुनर्लोपग्रहणसामर्थ्यात्तद्घस्रोरिति लोपस्य सर्वादेशत्वसिद्धेर्न तदर्थमपि शित्ग्रहणं।असंज्ञातविरोधन्या
येनोत्तरत्रैवाज्लोंत्यपरिभाषाबाधसंभवात्।वस्तुतस्तु विधीयमानो यो नेकाल्त्यर्थेप्यनुबंधानामेकांतत्वेपि च शित्ग्रहणं व्यर्थमेव शकारोच्चारणसामर्थ्या
दाद्येत्यादौ नैकाल्त्वमादायांत्येऽनेकाल्पदैर्गौणमुख्यसाधारणावयवत्ववतोन्यपदार्थत्वमाश्रित्य सर्वादेशत्वसिद्धेः।ज्ञापकमिति।ननु ज्ञापितेपि पुनर्वं

४ शेकारोच्चारणादेवानुबंधकृतमप्यनेकाल्त्वमादाय सर्वादेशत्वसिद्धेः। न चोच्चारणसामर्थ्यादिसंज्ञालोपावपि बाध्येयातामिति शिग्रहणमिति
ज्ञापितेन वैयर्थ्यमिति वाच्यं। ज्ञापनात्पूर्वं प्रसक्तयोरनयोर्बाधाय शिग्रहणं स्यादिति न तस्य वैयर्थ्यं। यदि भूतपूर्वानेकाल्त्वमादाय सर्वादेशत्वसंपाद
नेन कृतार्थस्य शकारस्य नेत्संज्ञालोपबाधकत्वं तर्हि ज्ञापितेपि तथैत्यवेहि। पुरधवादौ तु विजातीयानेकवर्णोच्चारणसामर्थ्यान्नेत्वं। नाप्यस्याः प्रयोज
नं प्रवेणस्त्रसवित्यादौ शकारस्यानुमर्थत्वेन भूतपूर्वानेकाल्त्वमादाय सर्वादेशप्रसक्तेः। विधौ अनेकाल् इत्यर्थे तु न मानमिति चेन्न। उच्चारणसाम
र्थ्येन भूतपूर्वानुबंधकृतानेकाल्त्वमादायापि न सर्वादेश इत्यर्थस्य शिग्रहणेन ज्ञापनात्। तेन दिवऔदित्यादौ तकारोच्चारणसामर्थ्येन भूतपूर्वानेका
ल्त्वमादाय न सर्वादेशत्वं। तत्रापि तपराकरणे त्वेषाम्वैयर्थ्यमिति तत्त्वं॥ ड्वादिविषये तु ति केचित्तत्रानुबंधपदं तद्योगिपरं। अतएव ङकारोऽविषये नानुबंधकृत न्य
मसारूप्यमिति विकल्पाभावः। अनेकाल्सूत्रे शित्पदं तद्योग्यपरं। अत एव डाच्। इति प्रश्लेषेण सर्वादेशत्वमुक्तमाकरे इति वदंति। अनेजंततत्त्वादिति। नन्
वादेच इति सूत्रे धातोरित्यस्यानिवृत्त्या पंतस्यानेजंतत्वे पि ततः पूर्वमेजंतत्वमादायात्वं सुलभं। न चैधादावात्वविरणाय शित्परत्वयोग्यस्यैवैजंतस्यात्वमि
ति पकारसत्त्वदशायां नात्वं अनेजंतत्वादित्यस्य शित्परत्वयोग्यैजंतत्वाभावादित्यर्थ इति वाच्यं। पलोपोत्तरं तत्संभवात्। कथं वा त्रतदंतविधिः विशेषाभा ४

वात्। न चोपदेश इत्यस्य विभक्तिविपरिणामेन विशेष्यतया तदंतविधौ समुदायोपदेश एव ऋषीणां तात्पर्येण पकारसत्त्वेनोपदिश्यमानेजंत
त्वमिति वात्वमिति वाच्यं। तथा सति पलोपोत्तरमिति पूर्वोत्तरग्रंथासंगतिरिति चेन्न। पलोपोत्तरं तदेवेदमिति प्रत्यभिज्ञाया एकादेच इत्यादौ विशेष
दिश्यमानत्वस्यैजंतत्वस्य च सत्त्वेनादोष इत्याशयात्॥ ७॥ ज्ञापकमिति। माङो व्यतिहारे ऽनभिधानमेतज्ज्ञाप्यप्रामाण्यादिति भावः। विस्तर इति।
यद्यप्युञ्जिवर्षदेदलित्रत्रपदग्रहणात् घुसंज्ञासूत्रे नदीनरेफस्यापादनपरभाष्यप्रामाण्यात् स्थानिवत्सूत्रे ऽनिल्वाद्याये पित्यत्र दीर्घकृत्ते पिच्छापृच्छा
सौ भूतपूर्व इति भाष्याच्चानुबंधसहितशब्दोपादाने इत्संज्ञकतदवयवे वेत्यर्थः। स्त्रीलिंगप्रकरणेप्येवं शब्दरत्ने। क्यस्येत्यत्र चेत्संज्ञककाद्यवयवक के त्ते वा १
स्येत्यर्थ इति न पकिदोषः। तथापि तदनाश्रित्येदमित्यदोषः॥ ७॥ अभिधानियामकत्वेति। नत्वं च शक्तिसंकोचत्वं। तत्त्वं च तात्पर्यज्ञानस्य शाब्दबो
धकारणत्वेन ग्राहकत्वं तदभावे प्रकरणसहकृतात्पदज्ञानादर्थविशेषस्येवोपस्थितात्वादर्थविशेषशाब्दबोधप्रयोजकपदजन्योपस्थितिविषयतानि
यामकत्वं बोध्यं। त्यं नेति। आर्षवत्वं नेत्यर्थः। तेन कतीत्यस्य सत्त्वेपि न दोषः॥ अकृत्रिमस्येवेति। सूत्रभेदेन कृत्रिमस्येवेत्याश्रयणे पुभयगतिरागतेति भावः। शा
ब्दार्थेति दं। बलवोधोपयोगीति। यद्यपि सकलजादिशब्दानां सामान्यरूपेण शक्तिग्रहादेव शाब्दबोधः। विशिष्य सकलजज्ञानस्यासंभवात्। तथापिहृर्षादि

५ पदवद्विशेषरूपेणानेकार्थबोधकस्य शब्दादिशब्दस्य विशेषरूपेणानेकेषु शक्तिग्रह एव तेषां तथा शाब्दबोधोपयोगिशक्तिग्रहशब्दबोधयोः

समानप्रकारकत्वेनैव कार्यकारणभावांगीकारादिति न कश्चिद्दोषः॥ ७॥ शयितेति। तदंतः पाठः। क्रांते तु निष्ठाशीङ्स्विदीति निषेधाद्विगुणसिद्धेः

अत्र यत्कार्यप्रतियः कार्यीस तं प्रति निमित्तं नेत्यर्थो बोध्यः। यद्यपि शयिता। रिरिषतीत्यादौ कार्यानुभवितृत्वमिकारादेर्निमित्तत्वं तु समुदायस्य। तथा

पिघटकतयापि निमित्तत्वस्यापि निषेधान्न दोषः। समवायीति। नत्वं चात्र कालिकं बोध्यं। इदं चिंत्यं। कालसंयोगं प्रति कालस्याद्वैतनये जगत्प्रति ब्रह्मण

स्तदुभयदर्शनात्। केचित्तु दृष्टकार्यस्य जसे समवायकारणस्य निमित्तकारणत्वेन। तेन श्रायस्तावित्यादाविकादेशस्याचः परस्मिन्निति स्थानिवत्त्वमित्या

हुः। ध्वनितेति। अचीत्यस्य जेप्रीयत इति प्रत्युदाहरणं अस्यां प्रतिकूलमिति नान्येषां ध्वनिता॥ १०॥ दापेरिति। परिभाषासिद्धेः पूर्वमपि दारूपस्यानि

रर्थकत्वमित्याशयः। बोध्य तदिति। घटकतयेति शेषः। नदारिति। अवयवशवयवद्वितिन्यायस्कसमुदायावयवत्वेन गृहीतस्यावृत्तेः यवविषयत्वेऽप्रकृते यवस्याबः

तु रेफजस्याकारावयवत्वं प्रतिपत्तिकालेनाकारस्य दशब्दावयवत्वप्रतिपत्तिरिति भावः। घुघुलोष्टित्वमचज्ञापकं। यद्वा शोरत्ते एधि येघिष्टित्यादौ रूपद्वसुदु

विधावुद्देश्यतयापरं परयावाक्शात्मनेपदलिङोराश्रयणं दाय्येरेतीत्यादौ तु नैवं। तदैयर्थ्यमिति। ननु सानुनासिकोकारार्थं तत्तत्किं चाम शब्दस्यकस्यो ५

८

तयासाधत्व एवाभावः। किंच निर्दिश्यमानपरिभाषया नात्र दीर्घसंभव इति चेन्न। आनस्य उँ इत्येव विधिविधापदीर्घविधौ कइत्यस्य पंचम्यंतनो चाश्रि

त्यपदागमन्यायेनैव सावपर्यमुपपाद्य वैयर्थ्योद्भावनसंभवात्। जहारेति। यदागमन्यायलब्धस्य तपरत्वेन नसाहृन्निरिति कृदंतप्रकरणे शेखरे असंग

त्येति। ननु वक्ष्यमाणे भविष्यामीत्याद्यर्थमकारांतोपदिश्यमाना द्वित्यर्थं आवश्यकः। किंच हलइत्याद्यर्थं तदंतविधिरावश्यकः। अन्यथा द्युपदेशात्परत्वेना

नुदात्तत्वापत्तेः। तथा च नात्र वर्णग्रहणं। नास्यनुदात्त इति सूत्रे शेखरे रूपेवमेवोक्तं। एवं नेकाच इत्यस्य प्रत्ययावयवेचीत्यर्थः। यद्वागमस्यपदेशेऽदंतत्वमेवप

दागमन्यायलब्धमिति। एवं नेकाच इत्यतोस्यैवैषम्यं। दीङ्गुड्चीत्यस्य तु क्ङितियो च तस्मिन्नित्यर्थः। न च जहि शत्रुमित्याद्यर्थं प्रत्ययाप्रत्यययोः प्रत्ययस्यैव

ग्रहणमिति परिभाषानुसर्त्तव्यात्तथा च नत एव हलइत्यादौ न दोषः। भविष्यामीत्यादौ तु समुदायोपदेशेऽवयवस्याप्युपदेशान्न दोष इति वाच्यं। तदंत

विध्यभावे उक्तपरिभाषया प्रत्ययस्यैवाकारस्य ग्रहणापत्त्या वक्ष्यमाणइत्यादौ दोषस्य दवस्य एवेत्यरुचेराह। किंचेति। बोध्य तइति। यद्यपीदं परिभाषां

तरं तथापीदमपि नकृहणेनगृह्यत इत्यत्र घटकतयेत्यस्यानर्थाहारेणेत्तन्मूलकमेवेति भावः। यद्वामुग्विधानेन पूर्वस्याद्यवास्या अपि वर्णग्रहणे प्रवृ

त्तिरेवज्ञाप्यते। वर्णग्रहणे पूर्वोप्रवृत्तिकसनमात्रेण मुग्वैयर्थ्यापरिहारात्। इदं चिंत्यं। आगमानामागमिधर्मत्वे शिष्येमानाभावात् फलाभावाच्च॥

प्रत्युतमिदचोंत्यादिति सूत्रे भाष्ये परादित्वे द्विपंतप इत्यत्र मोनुस्वार इत्यस्याप्रायस्वापादानं विरुध्यते। रामापा मित्यादौ पदांतस्येति णत्वनिषेधस्यै

६ पत्यातद्विनित्यत्वाश्रयणेमहाक्लेशः।पदांतभक्तःपदांतग्रहणेनग्राहिष्यतइतिङमुट्सूत्रभाष्यस्यायमर्थः।यदागमन्यायेनाऽङ्कुडागमेत्रि
त्रेनस्येत्यनेनङमुट्सहितस्यैवग्रहणात्कुर्वन्नास्तेइत्यत्रद्वयोर्नकारयोर्णत्वंप्राप्तेपदांतस्येत्यनेनवार्यतेद्वयोर्नयोःपदांततत्पर्याप्त्यधिकरणस्येत्यर्थेनु
नमानंफलाभावाच्चानस्येत्यस्यपदांतविशेषणत्वयानकारपर्याप्तपदांतत्वाश्रवणेनिषेधान्नरामाणामित्यादेरदोषः।तत्रचवर्णग्रहणेएवएवयदाग
मन्यायोभाष्याभिप्रेतइतिदिक्।अस्याज्ञापकमाह।अतएवेति।अयमर्थइति।इट्इत्यत्रबहुव्रीहिरार्धधातुकस्येत्यस्यस्थानषष्ठ्यंतत्वाश्रयणपरमादं
तावितिसूत्रस्थंभाष्यंत्वेकदेशयुक्तिरितिभावः।नत्वागइति।आद्यन्तावेकरूपित्यादौद्विविधोपिस्थान्यादेशभावोविवक्षितइतिभावः।षष्ठ्यंतमिति।अंतशब्दः
समीपवर्तिप्रकृतिवचनः।सूत्रेषष्ठीशब्दस्तत्रकृतौलाक्षणिकः।निर्दिश्यमानइतिचाध्याहारइतिभावः।प्रकृत्योच्चारणशब्दभेदात्तस्यस्यस्यनिर्दि
श्यमानत्वमतआह।सजातीयमिति।अवयवरूपमिति।ननुतदोरित्यादौत्यदादीनामइत्यादेर्नस्थानषष्ठीत्वमितिचेदत्रनव्याः।तदोरित्यस्यस्थानष
ष्ठीत्वबलेनोपस्थितेषातत्रफलाभावाद्विशेषणेपर्यवस्यतिइतिवदंति।परेतुसर्वादिसूत्रस्थभाष्याद्योगेनरान्वितेस्वार्थेपदानांशक्तिलाभेनस्वंरू
पमितिशास्त्रातिरिक्तग्राहकशास्त्रानुसंधानकाजिकोपस्थितिविषयत्वस्यनिर्दिश्यमानत्वेनतदोरित्यत्रअतदंतविधितःपूर्वंत्यदाद्यवयवतदो ६

रेवोपस्थितत्वात्तयोरेवनिर्दिश्यमानत्वान्नातिसइत्यादौदोषःइतिप्राहुः।नप्रतीयमानमितित्येवपाठः।इत्यर्थइत्यंतपाठेयुज्यतइत्यस्यपूर्वेणान्वयः।
अयमर्थइत्यस्यचशाब्दोन्वयःइत्यर्थः।इत्यर्थइत्यस्यचार्पिकार्थइत्यर्थः।धात्वादीनामिति।येनरूपेणप्रयोगघटकतातेनस्वरूपेणपदोपस्थापत्वंनि
र्दिश्यमानत्वंधातुपदाच्चभ्वादीनांतेनैवरूपेणोपस्थितिरितिभावः।स्वघाटार्थमिति।अत्रद्वयोर्विरोधेनपरयानेकाल्इत्यनयास्यबाधःस्यादतःअनो
ङित्वंसफलमितिकेचित्।विरोधादिति।यद्यपिविसर्गस्यनोच्चार्यमाणत्वंतथापिपूर्वोक्तरीत्यानिर्दिश्यमानत्वंनिर्वचनीयं।केचित्त्वबोध्याघटितत्वेस
तिस्वबोध्यत्वंतत्त्वमित्याहुस्तन्न।नन्वास्यत्वावित्यादिपूर्वग्रंथविरोधात्।भिंधकीत्यादौसाकचूकस्यहिशब्दस्याघटितत्वेनतत्वापत्यातदभावप्रतिपा
दकेनहृश्नन्म्यइतिसूत्रस्यभाष्येणविरोधाच्च।इदंचिंत्यं।वर्णग्रहणइत्यस्याअलग्रहणइत्यर्थात्।नापीति।विधिप्रदेशोद्वयोरंगां।गिभावेपिस्थात्वेत्यैणद्व
योर्नसः।तेनपरस्परनैरपेक्ष्येणद्वयोःप्रवृत्तिसिद्धिः।तत्राखेंत्यस्येत्यनेनास्याःसामानाधिकरण्यं।यथाणेरनिटीत्यादौएवंनांगस्यांत्यस्याणोणेरित्यर्थः।
क्वचिद्वैयधिकरण्यंतपात्यदादीनामइत्यादौ।तेनत्तानीत्यादौननुमस्यप्रात्युत्वं।उदस्थादित्यादि।ति।अस्मिन्जश्पेइत्यर्थः।सूत्रविषयइति।उदस्येतिसू
त्रविषयइत्यर्थः।उदस्येतिसूत्रविषयइत्यंनिपातरकसुगमः।संचारितत्वादिति।एतद्बाधकयोरप्येतद्बाध्ययरागमन्यायोपजीविनेनोदस्थादित्यादौ

७ नयोः प्रवृत्त्या एतद्वाध्यत्वमिति केयटाशयः इति परे। अकृत्स्निपइति। साकच्कान् पहारादेशविधावित्यर्थः। अत्र मानमनाप्यकइति प्रतिषेधः। फ
लं तु युवकाभ्यामित्यादिसिद्धिः। तदपहारके तु प्रतिषेधत एव न्यायः। यथा कुर्वन्त्यम्यदिति सूत्रे भाष्ये भिंधकीत्यादावकच्चिह्नित्वाभावान्नधित्वमित्याशंकि
तं। कादेशस्याप्युत्त्या पुनर्विधानसामर्थ्यात् साकच्कस्यापि प्रवर्त्तते। अत्रेदं विचार्यते। एषार्थवद्ग्रहणपरिभाषाबाधिका उत न। नांत्यः। आवस्यायामि
डिति पक्षे। पिबदित्यादौ पिबादेशानापत्तेः। स्यसिच् सूत्रे भाष्ये आगमसंनिधानेन तद्गृहीतस्यार्थवत्त्वाभावोक्तेः। नाद्यः। राज्ञेः पृथग्भ्राज्ञिग्रहणवैय
र्थ्यात्। वानरज्ञाब्दे नरयोरिति इत्यापत्तेश्च। एवं धातुत्वप्रत्ययत्वाद्यपि आगमसंनिधानेन तद्गृहीतेंगीक्रियते न वा। न तावदाद्यः। स्यसिच् सूत्रस्थ भाष्यविरोधा
त्। किंच ग्रहो लिटीत्यत्र एकाच इत्यस्य संबंधे ग्रहिष्ठेत्यत्र शेखरोक्तदीर्घाभावबोधनासंगतिः। इडग्रहिनस्य एकाचत्वात्। नांत्यः। धातोरिद्धिम इत्यस्मरेदिति
वार्त्तिकविरोधात्। जावस्यायामडिति सिद्धांते। स्वपादिदित्यादावतोह्लादेरिति इत्यनापत्तेः। न च सूत्रेतुंत्रे माङ्योगे चरितार्थं। किंचाज्झसे रित्यादौ पूर्वासद्वन्या
दोस्य सुकिज्जसः शीभावमाशंक्य निर्दिश्यमानपरिभाषया परिहृत्य यस्तर्हि निर्दिश्यत इति पुनराशंकितं तस्योक्तपक्षेः संगतं। निर्दिश्यमानत्र सोऽर्थवत्त्वप्र
त्ययत्वयोरभावात्। एवं यदागमन्यायस्य वर्णग्रहे प्रवृत्तौ लणसूत्रस्थ भाष्यविरोधस्तत्र द्विपरेण णग्रहणे चिकीर्षतीत्यादौ रपरत्वेनत्वाप्राप्तिमाशंक्य ७

उपधायाश्चेत्येवं भविष्यतीत्युक्तं। तदीयास्तन्न्यायेन रपरे सदंतत्वान्निर्दिश्यमानत्त्वकारस्येत्वे रूपसिद्धेः शंकाया असंगतिः। अजन्तवर्णत्वयोरप्या
गमसहितेएवसत्वेन समाधानासंगतिश्च। अनित्यत्वादुक्तन्यायाप्रवृत्तौ इष्टस्त्वेन प्रवृत्तेरावश्यकतया ततएवमात्रुणामित्यादावुपधायाश्चेतीत्वबा
रणे तदर्थधातुग्रहणवश्यकोक्त्यसंगतिः। किंच जहर्षेत्यादौ गुणेप्यजंतत्वानपायादच्वस्मात्त्वदिति सूत्रस्थं भाष्यं कारिष्यत इत्यादौ गुणे चिण्वदिडन
स्यादिति स्यसिच् सूत्रस्थं भाष्यं च विरुध्यते। एवं निर्दिश्यमानपरिभाषया वर्णग्रहणे प्रवृत्तौ मृजेवृद्धिरिति दूषणं प्रवृत्तौ देवदत्तार्थेत्यादावेव पचमा
न इत्यत्रापि निर्दिश्यमानपरिभाषया मुक्तो दीर्घाभावे विशिष्टस्य वर्णदीर्घे नदेयत्वमिति पूर्वग्रंथासंगतिरिति। अत्र ब्रूमः। निर्दिश्यमानपरिभाषा
या यदागमपरिभाषाबाधकत्वं नाम आगमप्रवृत्तेः पूर्वमागमिनो यथार्थवत्त्वं तत्र सदबोधकत्वादि तदागमे जातेपि तथैवेति। वार्त्तिके धातुपदं सा
मर्थ्यात्तत्वेन तद्घटपरं। दृप्यादेरिति चात्तो विशेषणं। यदागमन्यायस्तु वर्णग्रहणे न प्रवर्त्तते। स्यसिच् सूत्रे उपदेशग्रहणात्। पदांतत्वस्य वर्णमात्रवृ
त्तित्वाभावादेव नदोषः। गुणादिसंज्ञासु रेफरहिते एव वर्णग्रहणे उक्तन्यायाप्रवृत्त्या सरेफस्य गुणत्वाभावे परिरेफस्य वचनबोधितावयवत्वत्यागे
मानाभावेनावयवद्वारकांतर्भावादायाराराववेवेति नियमोपपत्तेः। एतेन रदाभ्यामिति सूत्रस्थ भाष्यमपि व्याख्यातं। उत्सर्गसमानदेशा इतिन्या

८ येन निर्दिश्यमानपरिभाषापि नाल्ग्रहणे। अत एवानुमानिकस्यान्यादेशाभावेद्रूवर्णान्तस्य तु र्विधीयमानेनैकारमात्रस्येति दिक्॥ ७॥ पदस्य
इति। अर्थतआंतर्य एवादेशात्वेनिर्णीते पदादिभिरादेशैः स्थानुरूपस्यान्यापेक्षा स्तिना न्यथेति भावः समानवर्णेइति। तत्फलं चरणस्य नपदादेशाः। त
स्य तस्मिन्नपुंसकत्वापत्तिः॥ ३॥ कल्पितान्वयेति। अन्वयव्यतिरेकौ पस्तत्र यत्स्याभावौ तौ च प्रत्ययादिना कल्पितावेवेत्यर्थः। वर्णग्रहणेनेति। अचमानं
नेदमिति सूत्रे ऽकोरितिप्रतिषेधः॥ ७॥ मुखमिवेति। वाख्यादिभ्योयः। निपातपदमिति। ननु चादीनां तथोपस्थित्या उपतिष्ठतां नाम तदंशएवाऽऽत्तस्य
तु न तथेति। कथं तत्र विशिष्टरूपोपादानं। किंच प्रकृतावारोपेण वर्त्तमानादेवच्विविधानेन मुख्यगौणार्थौ संभवतः। किंचैवं निपातोद्देश्यकार्यमात्रेष्वंत
स्याग्रहणापत्तिरिति चेत्। अत्र केचित्। चादयो विशिष्टरूपोपादानमात्रेण प्रवृत्तापरिभाषांशांतरमप्यनुगृह्णन्ति। कार्यांतरे त्वेनित्यत्वादस्याप्रवृत्तिरि
ति। देवतादंद्वेइति। अन्यंतसहचरितेलोकविज्ञाते द्वंद्वमितिउपसंख्यानमिति। निर्क निष्पन्नस्यार्थे च ग्रहणं। ङौ सूत्रे कोक्तं भोक्तं परिहरति। गांपाठ्ये
ति। अस्य पदकार्यविषयत्वे सूत्रं च्वितिसूत्रेजातिग्रहणमपि लिंगं। ननु किमिदं पदकार्यत्वं। न तावत्पदोद्देश्यकत्वं तद्धितविधावनुपस्थानापत्तेः। अंते ८
षांवक्ततः सुबंतावयवत्वावपि तदनुद्देश्यकत्वात्। नापि वक्ततः पदसंबंधित्वं णित्वस्यापि तत्त्वात्। वद्भूतद्वत्यादौ ह्याद्यादेशानापत्तिश्च। नापि प्र

त्ययानिमित्तकत्वं तत्। हरिताद्भ्योऽञ् इत्यस्यापितत्वेन तत्रैतस्याप्रवृत्तौ गोणिभ्योपित्तेभ्यः फगापत्तेरिति चेन्न। अंगसंज्ञानिमित्तकत्वे सति वक्त
तः पदसंबंधिकार्यत्वं तत्त्वमिति न कश्चिद्दोषः॥ ७॥ अंग यहणादिति। इणइत्यस्य षीध्वमादिविशेषणत्वेन बुबुधित्वेइत्यादौ न दोष इति भावः। परस्येति। एके पा०१
नयोगेन संबंधेन निर्दिष्टानामिति विग्रहः। अत्र चज्ञापकं सुबामंत्रित इत्यतः सुबित्यनुवर्त्तमाने सुप्प्रतिनेत्यत्र पुनः सुग्रहणं। असंबंधार्थमिति॥ संबंधशं
कावारणार्थमित्यर्थः। तावन्मात्रं ग्राह्यमिति। यक्ततः संख्यापदे स्वरितत्वं प्रतिज्ञायपुनरादिपदेन तत्प्रतिज्ञानमेतन्मूलं। केचिदादिपदमपरित्यज्यं तिकेन
प्रतिज्ञानं। सामर्थ्यादिति। योगविभागसामर्थ्यादित्यर्थः। ज्ञापयतीति। स्थालीपुलाकन्यायेन सूचयतीत्यर्थः। ज्ञापकमिति। ननु ज्ञापितेपिव्यर्थो लो
पेन सिद्धे ऽकारविधानसामर्थ्याद्दीर्घरूपसिद्धेरिति चेन्न। लोके सत्यकृत्सार्वधातुक इति दीर्घापत्तेः॥ ७॥ दिवउदिति। च्छ्वोःशूडित्यत्र कि ग्रहणानु
वृत्तिपक्षमाश्रित्येदं। तदनु वृत्तिपक्षे त्वाह। अत उदिति। नन्वेवमुरुपधायाइत्येवसिद्धे दीर्घोच्चारणंव्यर्थमिति चेन्न। गुहेर्णौर्यतात्वडित्रुपधा
कार्यस्यदित्वाह्याबस्येन गुणे उत्वेणौ चङीति ह्रस्वाप्रवृत्त्यर्थत्वात्। कुरुत इत्यत्र उदितितपरकरणेन गुणाप्रवृत्तिवत्। अत एवोऽदुपधाया गोह इति सूत्रे
उदितिप्रश्लेषेण गोहइति विकृतं निर्दिष्टं भाष्यकृता प्रत्याख्यानं। ऊदूदित्यर्थप्रश्लेषस्यावश्यकत्वात्। न चोत्वदशायां णौ चङीति ह्रस्वस्य बहिरंगतया

९ ःसिद्धत्वेनबाधासंभवइतिवाच्यं।अदितिदीर्घोच्चारणसामर्थ्येनोक्तभाष्यबलेनचबहिरंगस्याप्युपधात्वनिमित्तकत्वह्रस्वस्यबाधकल्पनात्॥छ॥प्र
त्ययस्येतराविशेषणत्वेतित्वे।वर्णाविशेषणत्वद्इत्यर्थः॥छ॥स्फुटमेतत्पाणिनेस्तित्यादि॥छ॥द्विवादेरिति।ततश्चसुपोधातुप्रातिपदिकयोरितिलु
गापत्तिरितिभावः।शब्दस्वरूपमिति।केचित्तुतदादेरित्यंशस्यविशेषणतयातदंतविधिरित्याहुः।अंगाक्षेति।तदंतांशस्तुनोपतिष्ठते।जेरवग्रहणे
नसामान्यतएवसमभ्यंततयोपात्तेप्रत्ययेतदंतविधभावकल्पनात्।तेनसुपिचेत्यादौनतदंतविधिः।तत्रतदादौशंशोपस्थितिफलंसुपूर्वेदेदत्राभ्या
मित्यादौसात्यदाद्योरितिनिषेधाभावः।कथंचिद्बोध्यं।एवमिति।प्रत्ययग्रहणेचेति।निषेधस्तुतदंतांशमात्रस्येतिभावः।एऐतादिति।नन्वेवमपिर
तरदित्यादावतिप्रसंगस्तदवस्थः।तदादित्वस्यप्रत्ययावयवाकारांतेपिसत्वादितिचेन्न।तत्रतदादौत्यंशोपस्थितिसामर्थ्येनसंबुध्यवयवाघटितस्यै
वतदादेर्ग्रहणात्।अंगसंज्ञायांप्रत्ययावयवाघटितस्यैवतदादेर्ग्रहणेनापिताद्दृशस्यैवगृहीतुमुचितत्वात्।वचनविशिष्टादिति।विशिष्टस्यत्वर्थवत्सूत्रे
णप्रातिपदिकत्वं।समासकृतनियमस्तुन।राजपुरुषावित्यादौपुरुषावित्यादेरिवगार्ग्यायणस्यानर्थकत्वेनार्थवद्भुत्तरभागाभावात्।नियमस्यसजाती
यापेक्षत्वेनपरस्पराव्यधिकरणवृत्तिद्वयाश्रयाघटितएवप्रवृत्तेः।राज्ञःकुमारीश्रितइतियुगपद्वृत्तिद्वयकल्पनायामपिप्रातिपदिकत्वंसमुदायस्यतुज ९

भः।अत्रसमासत्वप्रयुक्तमवयवस्यपद्यपिप्रातिपदिकत्वंहन्तन्नघितत्सूत्रेणा।त्ततथापिसुबुत्पत्तिःसमुदायादेवैकाज्द्विर्वचनन्यायात्।केचित्तुराजपुरुषा
वित्यादौपुरुषावित्यादेरेवनोक्तयोरेकदेशयोरर्थवत्त्वमितिनकश्चिद्दोषइत्याहुः।प्रत्ययमात्रेति।तत्रकृखंउगितश्चेत्यस्यप्राचीन्यादौप्रवृत्तिः।अन्यथो
गिद्सुमादिहितस्तदादेरभावान्नचतदनापत्तिः।ननुव्रतीतीषिषतीत्यत्राभ्यासांत्यस्याङ्गत्वेनेतिदीर्घकारणायोत्तरखंडप्रत्ययत्वाभावस्यशाठेदं
दुर्ज्ञेयत्वरेउक्तत्वेनसनंतस्यप्रत्ययाप्रत्ययसाधारण्येनसनाद्यंताइत्यत्रकथमेतदुपस्थितिरितिचेन्न।प्रत्ययमात्रग्रहणादित्यस्यप्रत्ययधातूभयसा
धारणरूपग्रहणइत्यर्थेनादोषात्।यद्वसनंतस्योभयसाधारण्येपिसनाद्यंताइत्यत्रप्रत्ययाधिकारस्थस्यैवग्रहणेनादोषः।वस्तुतोद्विर्वचनेस
न्यत्वप्रत्ययादिसमुदायएवनोत्तरखंडस्येतिसनंतत्वंप्रत्ययमात्रवृत्ति।अतएवसुविनिर्दुर्भ्यइतिसूत्रेकेपठेनविषुसुपुरित्यत्रसमुदायस्यैवसुपित्वमु
क्तं।दयतेरितिसूत्रस्थंभाष्यंतुस्तागमकस्यैवसाभ्यासस्यनिर्दिश्यमानत्वाभावेनोत्तरखंडस्यैवषत्वेनोपपन्नं।अतएवभस्रोरितिसूत्रभाष्येबरी
भ्रज्जतइत्यत्ररीकोरेफस्यलोपमाशंक्योपदेशइत्यनुवृत्त्यासमाहितं।अतएवोर्णुनुवत्तुरित्यादौद्वित्वेउयङ्।अनुसस्यंदइत्यत्रानुविपर्यभिनि
भ्यइतिषत्वं।धत्तइत्यत्रदधस्तथोरितिभष्भावः।अत्तीषिषतीत्यत्राभ्यासस्यदीर्घाभावश्चदीर्घः।स्कादिषिनिसूत्रेणघ्वोक्तंसुनोत्यादावयवत्वस्यैवतस्सं

१० त्वंध्यवयवस्यापिषष्ठ्यर्थत्वं यद्यत्र प्रकरणे तत्रधातोरिवतन्नदानुपूर्वीकस्यापि ग्रहणमित्यादि तु स्वरूपव्याक्षेपयैव परास्कृतं। प्रतीषिषतीत्युच्यो
न्तरखंडस्य प्रत्ययाधिकारस्थत्वाभावेचोत्तरखंडस्य तनादिविशेषस्योक्तं थानुत्वमपि न स्यात् भ्वादित्वाभावात्। ननूत्तरखंडस्य प्रत्ययत्वाद्यनंगीकारे प्रती
षिषतीत्यत्र कथं सन्यत इतीत्वमिति चेन्न। सन्यत इत्यस्य सनीत्यस्य निमित्तसप्तमीत्वेन सन्निमित्ताभ्यासस्येत्यर्थेनादोषात्। प्रत्याद्यसमभिव्याहारे तु
अइअने ति दीर्घे णे षिषतीत्येव साधु। अपाटिटदित्यादौ णिलोपस्थानिवत्त्वं तांगस्यांत्यस्यात्रित्यर्थेन सुलभं। एवंच पूर्वं धातुः साधनेनेति सिद्धांते दित्तोचरंने
विद्याइत्यादौ नां प्रवृत्तिः साधुसंगच्छते इति दिक्॥ छ॥ यत्रेति। अपंचम्याइति प्रसज्यप्रतिषेध इति भावः। कार्यांतरविधानायेति स्वरूपकथनं। धातुत
कारस्येति। धातोः परस्य प्रत्ययतकारस्येत्यर्थः। निर्दिश्यमानस्येति परिभाषणात्। स्वंरूपमिति। शास्त्रातिरिक्तसंज्ञाशास्त्रं विनोपस्थाप्यत्वं निर्दि
श्यमानत्वमिति सा त्र नोपतिष्ठते। अत एव रदाभ्यामिति सूत्रे भाष्ये रदाभ्यामिति किमर्थं चरितंमुदितं। ननु रदाभ्यामित्युच्यमाने ष्वच्यप्राप्नोति
रदाभ्यां निष्ठानविशेष्यते किं तर्हि तकारो विशेष्यते इत्युक्तं। अन्यथा निर्दिश्यमाननिष्ठायारेफदाभ्यां परत्वाभावेनातिप्रसंगवारणेन तदसंगतिः १०
तत्र सूत्रे तग्रहणमपि उक्तार्थं एव सकलंनान्यथेति दिक्। एकविषयत्वमिति। तदादिति तदंतांशयोः सामानाधिकरण्येनान्वय इत्यर्थः। ननु स्यतासीत्यत्र धा

तोरित्यस्य तासिभ्यामेवान्वयेन लुङ्लुटोः पंचम्यंतात्परत्वेनाश्रयणात्तदंतविधिर्दुर्वार अत आह स्यतासी इति। इत्याबभ्य इत्यादाविति। ङ्यांबंशेन तदंतवि
ध्यनापत्तिरूपो दोष इत्यर्थः। विशेषणत्वाभावादिति। ङ्याबंशइति शेषः। उत्तमैकाभ्यांमिति। सुपि चेत्यस्य सुबंत इत्यर्थेन निर्देशासंगतिरिति भावः। यत्र
वंसति घरूपेत्यत्रापि तदंतविध्यभावोपपत्तावुत्तरपदादिधिकारे इत्युक्तत्वरपरिभाषावैयर्थ्यं तस्मादयुक्तमेतदित्याहुः॥ छ॥ कुमारीब्राह्मणीरूपेति। स्वितिप्र
दर्शनमेतत्। अन्यथा पुंवद्भावेनोक्तरूपस्य दुर्लभत्वात्। उत्तरपदेति। परे तु खेरयग्रहणेन सप्तम्यंततया प्रत्ययग्रहणेन तदंतग्रहणमित्येव ज्ञाप्यते उत्तरपदाधि
कारे इति विशेषणप्रयोजनाभावात् तेन सुपि चेत्यादौ न दोषः। रात्रेकृति उपसर्गस्य घञीत्यादौ सामर्थ्यात्तदंतविधिरित्याहुः॥ छ॥ ३६॥ २१॥ पदान्तरत्वाभावे
नेति। पदादित्यस्य उक्तत्वेन च सुपीत्यलः प्रागेव निवृत्तेरयुक्तमेतत्। कृत्स्वरेणेति। नन्वेनंतरग्रहणस्योदेशपूर्वपदत्वेपि स्वरार्थत्वेनोक्तपरिभाषाज्ञापकत्वा
संभवेन तस्याएवाद्याप्यभावेकथमेतत्। उक्तं तच्छब्दस्याकृदंतत्वात्। न च वनोरन्चेति वत्तदंतविधि स्वांगीकारेणैतदुपपत्तिरिति वाच्यं। एवमेवोपपत्ता
युक्तपरिभाषावैयर्थ्यापत्तेः। गतिकारकेतरपूर्वस्यापि स्वरापत्तेश्चेति चेन्न। गतिरित्यस्यैवावृत्त्या पुनर्विधानेनोदेशपूर्वत्वेपि स्वरसिद्धौ ऽनंतरग्रहणस्य
बहितव्यावृत्त्यर्थत्वेनिश्चितत्वेनोक्तपरिभाषायां ज्ञापितायां तामंगीकृत्य कृत्स्वरेणोदात्तत्वसाधनात्। यद्वा ऽनंतरग्रहणेन प्राचीनपठितोक्तपरिभाषाज्ञाप

११ नपूर्वककारकादेरपरमित्युक्तनियमेनाभ्युद्धृतमित्यादावुदः स्वरप्रयोजकत्वेनैकप्रयोजनकत्वसिध्यानन्यपरित्यागेनापूर्वपदस्वरमात्रप्रयोजनकत्वस्या
न्याय्यत्वेन पूर्वकस्यैवाश्रयणमित्याशयात् परत्वादिति। उत्कृष्टत्वादपवादत्वादित्यिथ(?)वत्। यद्वा रुग्ग्रहणपरिभाषायामवकाशः व्यावक्रोशी व्यावहासीति। णचः
स्त्रियामिति पूर्वस्यापि णजन्तत्वात्। अनिसन्तिष्ठद्भिर्स्वरो भवतः अवन्हित्प्रत्ययग्रहणपरिभाषास्त्रीप्रत्यये चानुपसर्जने न तिनिषेधाच्चोपतिष्ठते नचात्र रुग्ग्रहणप
रिभाषायाः फलाभावः अधिकव्यवच्छेदार्थत्वात्। स्पष्टं चेदं समासेनञ्पूर्वे इति सूत्रे भाष्यकैयटयोः। अत एवेति। उक्तार्थकरणादेवेत्यर्थः परिभाषाभ्यामिति। ननु
गतिकारकोपपदानां इत्यस्य किमत्र कृत्यमिति चेन्न। संपूर्वात्कुटेरभिविधौ भावे इनुणित्यनेनेनुणि कुटिनिन्यस्मात् अप्रसमर्थविभक्तिं वाधित्वा स्वार्थिकत्वेनांत
रंगत्वादणिनुण इत्यनेनाण् प्रत्यये उकाराकारस्य वृद्धाप (?) प्राक्सुबुत्पत्तेः समासे सांकुटिनमित्यस्य अंतरंगत्वात् पूर्वं समासेऽणप्रत्यये हि प्रातिपदिकविशेषापेक्षत्वा
द्बहिरंगः तत्र संकुटिन्नित्यस्मात् समासप्रातिपदिकादण्प्रत्यये सति ईष्टं सिध्यति। अन्यथेति। उक्तार्थमनंगीकृत्य गत्यादिसमवधाने पि केवलस्य ग्रहणे। केवलस्य
ग्रांतत्वेनेति परे तु सुखप्राप्त इत्यादौ प्रकृतिस्वराप्रवृत्तये हीनवाचि निसमासे क्रान्ते परे द्वितीयांते प्रकृत्यर्थके हीन इति सूत्रे ऽनुपसर्गइ इति वक्तव्यमिति वार्त्तिकमस्यां
कारकांशे गतिरनंतर इत्यत्रानुवर्त्तमानमनुपसर्ग इति गत्यंशे ज्ञापकं। एवं च नञ्स्यैव नमस्कालीपूर्वकन्यायाश्रयणक्लेशः। ननु गतिरनंतर इत्युक्त ११

रिभाषया गत्यादिपूर्वस्यैव ग्रहणे सूत्रस्योक्तिसंभवाभावः। गतेः क्रान्तपरत्वासंभवात् सामर्थ्यादुक्तपरिभाषाया अप्रवृत्तावभ्युद्धृतमित्यादावभेःकेव
लक्रांतपरत्वाभावादेव स्वराप्रवृत्तौ ज्ञापितेप्यनंतरग्रहणवैयर्थ्यमिति चेन्न। यस्य गतेः प्रकृतिस्वरः कार्यस्तस्यैव सामर्थ्येनक्रान्तप्रवेशकल्पनात्। ननु
क्रग्रहणे गतिपूर्वस्य ग्रहणं ज्ञाप्यतां कथं कारकपूर्वस्य ज्ञाप्यते। उच्यते। एकदेशानुमत्या प्राचीनपठितपरिभाषाज्ञापनात्। यद्वा कारकांशे हीने द्वितीये
तिसूत्रेनुपसर्गग्रहणं ज्ञापकं। ननु ज्ञापितेपि न चारितार्थ्यं। अभ्युद्धृतमित्यादौ परत्वाज्जतिर्गतेत्यस्यैव प्रवृत्तेरिति चेन्न कचित्पूर्वविप्रतिषेधाश्रयणात्
पनेन ज्ञापनात्। इयं गतिरनंतर इति सूत्रे भाष्ये स्पष्टा। २८। अत एवेति परमातिमहानित्यादौ दीर्घस्येष्टत्वादेवेत्यर्थः। २९। अस्यापत्यमिति। तस्य चेति
पाठमनाश्रित्येदं। तदाश्रयणे तु कुरूनद्द्गतिवीक्ष्य। तेन तुल्यमिति। अर्थिकार्थकथमेने न्तत्। वतिस्क समम्यंतात्। उपमेयेसप्तमीदर्शनात्। हरिश्चिति। ननु द
त रीत्यादौ ईदं सहाय लव्यपदेशभाजः समुदायस्य सत्वेन ससहायत्वात्कथमत्र सः। द्विवचनत्वसमानाधिकरणमीदंतत्वं न मुख्यमन्यत्रेति चेद्धरिश्चित्यत्रापि सुप्र
समानाधिकरणं सुबंतत्वमपि मुख्यं नान्यत्रेति तुल्यं। अपद्विवचनवत्सुपृविशेष्यतयानोपात्त इति चेत्तथापि भवतीत्यादौ कथं भूइत्यस्यांगत्वं। अंगसंज्ञा
यां सामान्यतः प्रत्ययइत्युक्तत्वेन तिपो पि ग्रहणसंभवेन तमादाय मुख्यतद्दादिसंभवेन ससहायत्वात्। अप्रत्ययपदेन शपो ग्रहणे ऽसहायत्वमेवेति चेदत्रा

१२ पित्राब्दरूपमिति विशेष्येण सुप एव ग्रहणे ऽसहायत्वमिति चेन्न। शब्दस्वरूपस्य समुदायावयवसाधारण्येन तद्विशिष्टस्य सुबंतत्वस्य ससहायत्वात्। प्रत्य
यत्वस्य तु प्रत्येकं पर्याप्ततया न च भक्तैरेव ग्राह्यतया ऽपोग्रहणे ऽसहायत्वमिति वैषम्यात्। कार्यकालपक्षइति। यथोद्देशेतु स्यानिवत्त्वेनैव प्रातिपदिकत्वसिद्धि
रितिभावः। इदमुपलक्षणं। इशब्दाद्यजि जोस्त्रीलिङ्गस्य इत्यपि बोध्यं। शिवापुत्रस्येति। वर्णसादृश्यत्। अनेन चातिदेशेनाधाराधेयभावस्य तद्धाप्यधर्मासति
दिद्वयं तेनान्ये। तेन प्रत्ययमप्येत्यादावलोपस्यासिद्धत्वाल्लोपो न स्यादित्यर्थकेन सिद्धयस्त्रस्य भाष्येण न विरोधः। लोके। दृष्टेनेन पूर्वेश्चारितत्वस्यानतिदेशात्॥
अपर्यालोचनयेति। परे तु धात्ववयवस्यैकान्तःप्रथमस्येतिहि द्वित्वविधावुपात्तं। तत्र न्निजे नैतच्चिलये पितं किंचिदित्यसहायतैव। यथाहरीइत्यादावीदंतद्विवचना
भावेन सा तथा च निजितिसमुदायस्यैकाच्त्वेपि न धात्ववयवत्वं। इकारस्य धात्ववयवत्वेपि नैकाच्त्वं। निशब्देइकाराच्छेतयोः सतोरपि न प्रथमत्वमित्यसहायत्वात्सु
स्थैवेत्याहुः॥छ॥ अत एवेति। प्रत्ययांशानुवादत्वादेवेत्यर्थः। तद्रूपेणेति। उगिद्वर्णान्यरूपेणेत्यर्थः। तेनागृह्या ऽप्य ऽङ्ग्यंधकेत्यादौ न लदंतविधिः॥छ॥ चरितार्थमिति
मदः प्रत्ययत्वमाश्रित्येदं। तेनाहन्निति। वस्क तस्कस्कोपादानं। दिशब्दविषयएवैषा। अन्यथारोणीत्यादीनां वनोरन्चेत्यादीनां केवले ऽप्रवृत्त्यापत्तेः। एतदर्थ
तदंतविधौ तस्य चेति पाठेगौरवं च। निष्कृष्यैकार्थीभावाभावेपि तद्धितस्त्रीप्रत्यययोः अप्रवृत्त्याजकरोणेत्तथापाठे ऽवयवादिति तद्धितापत्तिश्चेतिदिक्॥छ॥ अपदा १२

दोयमिति। तेन सामानाधिकरण्येन विशेषणविशेष्यभावविषयेषात्तेनेषुगमीत्यत्रैतत्स्मरत्याइषाणेत्यत्र न छत्वं। वाचनिकीति। यत्तु नत्यपीतिज्ञाप
कसिद्धेयेत्तिपाठकेनोक्तं तन्न। प्रदायच्छत्रमित्यादौ तुकिईत्त्ववारणार्थत्वात्। न च बहिरंगपरिभाषयातुकोनासिद्धत्वनाजानंतर्यइतिनिषेधात्। स्वरूपस
तीति। ननु तदर्थोपीत्यर्थः। निरूपितमिति। तत्र चह्यैवमुक्तं। वसादेरित्यनुवर्त्यविशेषणवत्पदार्थस्य तत्कारेण विशेषणात्तकाररूपवसादेरित्यर्थइति॥
परे तु आदियहणाभावेबलिपरेआर्द्धधातुकस्येडित्यर्थापत्तिः विजातीयविभक्त्युच्चारणे वैयधिकरण्येनान्वयस्यौत्सर्गिकत्वात्। तीषसहेत्यादौ रूपरिष्
तिपंचम्यातीतिसप्तम्याः षष्ठ्यर्थनिर्णयेन रावणं तृणाय मन्ये श्रीराम इत्यादौ द्रव सामानाधिकरण्येनान्वयः। तीत्यत्र वस्तु विशेषणत्वं तत्र युक्तमिति स्फु
टमेव। कसीत्यादौ सीत्यस्य पदस्येत्यनेन सामानाधिकरण्येनान्वयेत्वदुष्करीत्या तदादिविध्यभावेपि तदंतविध्यापत्त्याः निष्टप्रसंगेन न कार
णायनलोपसूत्रे भाष्ये कस्यौत्सर्गिकस्य पदस्येत्यस्य वैयधिकरण्येनान्वयस्य स्वीकारे तत एव तदादिविधेरप्यभावेनादोषादित्याहुः॥छ॥
नद्रीति। द्वंद्वश्चेत्यत्रैषेवसमाहार इति नियमे एकवचनस्य दोर्लभ्यात्तद्वैयर्थ्यमिति भावः। तदेतद्दूष्यति। अत एव बहुदंडत्वैति। द्विवचनव्यावृत्त्यर्थंतु
नतत्। तिष्य एकाताराः पुनर्वसू द्वे ताराः इत्याकारात्। नद्वैकस्मिकत्वस्येति। केचित्तु क्षीरोदके इति भाष्यप्रयोगात् ज्ञाप्तिप्राधान्यएवेदमित्याहुः। न

१३ न्येकशेषेणबहुवचनसंभवः।जातिरप्राणिनामित्यस्यानुवादकतयातन्निवर्त्तनासामर्थ्यादितिचेन्न।तिष्यपुनर्वस्वोःसमुदायस्यानेकत्वा
भावात्।युगभेदेनतद्भेदकल्पनयातथाप्रयोगेनहृष्टतरंमानमित्याशयात्।।३४।।३५।।३६।।कार्यकालपक्षइति।आकडारीयसंज्ञासुयथोद्देशप
क्षएवेतिपूर्वग्रंथेनविरुद्धमेतदितिकेचित्।एतदुदाहरणंचकारेति।अत्रघुरदित्यत्रहस्वादित्रोपसिद्धिः।आनुमानिकस्थान्यादेशभावमाश्रित्य
तुननिर्वाहः।अभ्यासस्यानिरर्थकत्वात्।नचस्थानिवत्सूत्रेणोरवरेआरित्यादाविवपुनरभ्याससंज्ञातथासत्युरणस्सूत्रेनवयवक्तव्यश्चेत्यादौ।भाष्योक्त
स्यस्वेनानुदितस्यासंगत्यापत्त्या।द्विरुच्चारणविषयस्यपूर्वस्यैवग्राहणात्।अधिकंतुशब्देंदुशेखरव्याख्यायांबोध्यं।नन्वनन्यशब्दादेतिनातिदेशोय
मितिप्रतीयतेतत्तुनयुक्तंभेदएवातिदेशांगीकारादित्यतआह।अनन्यवदिति।आदेशाग्रहणमूलकोयमितिदीक्षितोक्तंदूषयति।लोकेति।अत
एवेति।लोकन्यायसिद्धत्वादेवेत्यर्थः।शब्दैकदेशाइति।अत्रह्यर्थस्यैवावधित्वमेष्टव्यं।अर्थानामेवावधित्वस्येष्टत्वेनसजातीयानामेवावध्यवधि
भावस्यप्रसिद्धत्वात्।तेनप्राक्रीताच्छइत्यस्यनासमासइत्यादौसंबंधः।अनुकरणत्वेनशब्दस्यरूपार्थकत्वं।शब्दस्यैवावधित्वमित्यापत्तेः।किंच
तत्वेनप्रत्यभिज्ञेयपरं।अतएवप्राग्दीव्यतइत्यत्रभाष्येदीव्यतिशब्देदीव्यच्छब्देलितस्मादेषापंचमीत्युक्तं।तथाचैकदेशविकृतस्यानन्यत्वाद्दीव्य १३

च्छब्दादौव्यत्यर्थस्यावधित्वमित्यत्तकाइत्यंतस्यतात्पर्यंकिमर्थमिति।दीव्यतेरित्यनुक्त्वाकुतइयंवक्रगतिरितिप्रश्नार्थः।ज्ञापयतीति।बोधयतीत्य
र्थो।विवक्षितोनार्थापत्तिः।उक्तपरिमाणेति।परिच्छिन्नपरिमाणेत्यर्थः।यथाजरायाइत्यादौ।नन्वनेनैवन्यायेनसिद्धेस्थानिवत्सूत्रंव्यर्थमित्याशं
क्याह।यचेति।यथाराममित्यादौमकारस्यानेनसुप्त्वाभावात्सुपिचेतिदीर्घोनविकृतेति।यथापंचवः।नःइत्यादौसुबंतत्वेनपदत्वं।तेतिष्ठेत्यादौति
ङ्तिङ्इतिनिघातः।अगुरित्यादौसिजभ्यस्तेतिजुस्भावश्चसिध्यति।नन्वेवंमघवतइत्यत्रस्थानिवत्त्वेन्नंतत्वाच्छ्वयुवेतिसंप्रसारणापत्तिरितिचे
न्न।अनइत्यस्याश्रूयमाणान्नंतएवतत्प्रवृत्तेः।अतएवबहुश्वेत्यत्रनसंप्रसारणं।नन्वेवंगुडोदकमित्यादावेकदेशविकृतन्यायेनदकश
ब्दउदकशब्दत्वंनस्यादुक्तपरिमाणएतदप्रवृत्तेः।किंचप्राग्दीव्यतइत्यत्राप्युक्तपरिमाणसत्त्वेनातदप्रवृत्तौउक्तभाष्यासंगतिः।किंचकार्येत्या
दौअर्द्धविकारस्तत्त्वेनाभ्यासत्वानापत्तिरतःसिद्धांतनिष्कर्षमाह।क्वचिदिति।तथाचस्थानिवत्सूत्रेआदेशग्रहणात्क्वचिदेतदनाश्रयणमित्य
वसारं।नत्वुक्तपरिमाणइत्यादिप्रायुक्तमितिभावः।।३७।।३८।।मिंधकीति।क्वचित्पुस्तकेमिंधीत्यत्रपरत्वाज्ञातङिधिभावोनस्यादितिपाठोदृश्यते
सतुनयुक्तः।तातङोवैकल्पिकत्वेनतदभावेधिभावस्यत्वोक्तरूपसिद्धेः।अत्रवदंति।विकल्पशास्त्राणामभावपर्यंतमपितात्पर्यं।तथाचयस्यह

१५ सद्दृत्यत्रभाष्यं। संघातग्रहणं चेत् कस्य विभाषायां दोषो भवति सन्निधितासन्निधिता यदा लोपस्तदा सर्वस्य लोपः यदा ऽलोपस्तदा सर्वस्या
प्यलोपः प्राप्नोति। तथा च भिंधी तिपाठोपि सुयोजः। शाब्देंदुशेखरो विप्रतिषेधसूत्रस्थोप्येवमेव योजनीय इति। अचो ञ्णिति। अभावपर्यंततात्पर्ये
पि विधिभावस्याभावेन। विरोधाद्विप्रतिषेधेनैव संगतिः। किंच प्राप्तविभाषाणामेवाभावपर्यंततात्पर्यं नाप्राप्तविभाषाणां। तथा च स्वरती। तिसूत्रभा
ष्ये यदि स्वरतिरुदात्तः पद्येत विप्रतिषेधं स्वरतेर्वेडागमः स्यात्प्रतिषेधेनेति। तच्चोपपद्यते। किं कारणं सविधिरयं प्रतिषेधः। विधिप्रतिषेधयोश्चा
युक्तो विप्रतिषेधः। यदातु स्वरतिरनुदात्तस्तदा विभाषा विप्रतिषेधोपपत्तिरिति। कस्य विभाषेत्यस्यापि प्राप्तविभाषात्वात्तत्पर्यंततात्पर्यं। अनए
वमुमुक्षतेरस्स इत्यत्र नाभ्यासलोपः। अन्यथा मुचोऽकर्मकस्येत्यनेनाभावस्यापि विधानात्तस्य चात्र लोपे इत्यत्राच ग्रहणेन ग्रहणात्तदापत्तिः
मम तु हलंताच्चेति किर्त्वेन नाप्राप्तगुणविधानेन प्राप्तविभाषात्वाभावात् नाभावपर्यंततात्पर्यमित्यदोषः। एवं च प्रकृते नातङो प्राप्तविभाषात्वे
न नाभावपर्यंततात्पर्यमिति। नन्वेवं प्राप्तविभाषायामभावतात्पर्यकत्वे उभयथर्क्षु इत्यस्यापि तथात्वापत्त्या रूत्वाभावे प्यनुनासिक इत्यनुना
सिकापत्तिः। किंच द्वितीय तृतीय चतुर्थेत्यस्यापि तथात्वेनैतद्बाधितसमासाभावे ऽपवादेन बाधितस्य पक्षे षष्ठीसमासस्यानापत्तिरिति चेन्न। अत्रा १५

नुनासिक इत्यत्र पूर्वत्वस्य सावधिकत्वेनैतत्प्रकरणविहितकार्यापेक्षस्यैव तस्य संनिधानाद्ग्रहणे नावध्यवधिमतोः साजात्यनियमेन
अभावस्य तदवधित्वाभावादेव रूत्वाप्रवृत्तेः। संमो वेति विहितमालोपस्य तु वैजात्येप्यत्र प्रकरणे विधानसामर्थ्यादवधित्वं। षष्ठीसमासस्त्व
न्यतरस्यांग्रहणसामर्थ्यात्पक्षे सुलभः। यद्वा द्वितीयादीनि प्रथमं तेन निर्दिश्यन के नापि समासो विहित इत्यत्र प्राप्तविभाषैवेषा। किंच भिंधी
तिपाठे तात् ङाबाधितस्य धेः पुनः प्रसंगविज्ञानेभिन्नादित्यस्य दत्तजलांजलिता। भावांशे सकृद्गतिन्यायाश्रयणे ऽभावांशे पुनः प्रसंगविज्ञा
नाश्रयणे चार्धजरतीयमिति दिक्॥ छ॥ सकृद्बाधितं न सर्वथा बाधितमेवेत्यर्थः। अत्र च दृष्टांतस्तन्जादिवदिति। हेतुस्तु बाधकाभावादिति। यथे
त्यारभ्य कार्यं करोतीत्यंतो ग्रंथः। उपचद्दृष्टांतो हेतुप्रतिपादक इतितु न भ्रमितव्यं। तत्रज स्यानुसारात् क्वचिच्छास्त्रीयदृष्टांताश्रयणमित्यत्र स्वग्रंथविरो
धात्। किंतु यथेत्यारभ्यत येत्यंत एको दृष्टांतः। तत्र च द्विर्यथा तथयोरभावादेवमेव भाष्यस्वरसाच्च। तयोः पर्यायेणोक्तौ तः क्रिः कृ त्वरत्र युगपदित्यस्य ना
नादिक्षु चेत्यस्य चावृत्त्यप्रदर्शनाय। अत्र च प्रेष्यस्थानीयता संस्कार्यस्य जस्य तुल्यबलपुरुषद्वयस्थानीयता तुल्यबलयोर्जश्शसोरिति बोध्यं।
युगपदुभयासंभवांशे चायं दृष्टांतः। नानादिक्षु चेत्येतत् युगपदुभयासंभवे हेतुकथनाय। ननु दार्ष्टांतिके नुगमाय। अनवयवनेत्यस्य विवरणं साक

१५ त्वेनेति। अनुबंध इतिसानुस्वारः पाठः। अन्यथाप्यपदापत्तेः। प्रतिबध्येति पाठे नैय्यायिकानां प्रामादिक एव। भाष्यसंमत मार्ग एवेति। परे तु
दृष्टांतस्य संभावकत्वेपि नार्थनिश्चायकत्वं। अर्थनिश्चयस्तु हेतुत एव। तथा च विप्रतिषेधसूत्रस्य भाष्यस्य हेतुविशेषमपुरस्कृत्य न दृष्टांतमात्रेण
कृत्यार्थैक्यसाधनाय प्रवृत्तिः। किंतु न तु रकारेणैव तत्राप्रतिपत्तौ हेतुस्तु प्यवजत्वादिति। अत्र शास्त्रीयदृष्टांताभावाद्यदा तमुभावि नितौ किं कद
ष्टांतो भगवता भाष्यकृतोपन्यस्तः। पर्यायेण प्रतिपत्तौ हेतुस्तु अनवयवप्रसंगात् प्रतिपदविधेश्चेति। दृष्टांते नेहेतूपपादनमुखेन दार्ष्टांतिके तत्समानए
वतात्पर्यात्। अत्र च दृष्टांतस्त्वजादिः। तत्र च प्रतिपदविधिरूपो हेतुर्व्यक्तिपदार्थपक्ष एवोपपद्यते। तथा हि। व्यक्तिपक्षे पाणिनिप्रदितशास्त्रं न त्वाक्षास्त्रस्य
संस्कारकं। अनेकविषयत्वापत्तेः। किंतु यणो मय इति बद्धिनिगमनाविरहात्तत्तल्लक्ष्यविषयकवाक्यकल्पनं। कश्चित्तैश्चैतैर्लक्ष्यसंस्कार इति क्रमः। एवं
चानन्तशास्त्राणामनवकाशत्वलक्षणं प्रतिपदविधित्वं स्पष्टमेव। अत एव विप्रतिषेधसूत्रे भाष्ये प्रतिपत्तिर्वोभयोस्तुल्यत्वात्। तत्र प्रतिपत्त्यर्थे वचनमि
तुक्तात्वप्रहादीनां त्वप्रसिद्धिर्नहि तत्प्रहादिषु नैष दोषः। किं चिन्नियमकारिशास्त्रमारभ्य नैयेन तत्प्रहादयः स्युः। यश्च भवता हेतुर्व्यपदिष्टः अतिपत्तिर्वो
भयोस्तुल्यबलत्वादिति सतुल्यत्वव्यदादिषु नैष दोषः। अनवकाशास्त्वप्रहादय उच्यंते ते च वचनाद्भविष्यंति। यश्च भवता हेतुर्व्यपदिष्टस्त्वजादिभिस्तुल्य १५

पर्यायः प्राप्नोतीति सतुल्यत्वप्रदादिषु इत्युक्तं। तत्र त्वजादिभिरिति प्रतीकमुपादाय कैयटेनोक्तं। आदिशब्दस्य प्रकारार्थत्वात्त्वजादिभ्यस्तत्प्रदादयोन
भिन्ना इत्यर्थ इति। जातिपक्षे च शास्त्रस्य सर्वविषयकत्वान्नैव लक्ष्यसंस्कारात्तस्य चान्यत्र चारितार्थ्यान्न प्रतिपदविधित्वमिति प्राहुः। असंभव एवेति। न त्वे
ककार्यित्वमिति भावः। तत्फलमाह। यथेति। नाभावो नाशि चिच्चरितार्थः। संज्ञानां त्वेकविषयाणामेव बाध्यबाधकभावः। आकडारादित्यनेन तादृशा
नामेव परस्परसमावेशाबोधनात्। हृस्वांतांगेति। यद्यागमन्यायस्यानुप्रवृत्त्यनंतरं प्रवृत्तावपि गुणसंज्ञाविधौ तदादिग्रहणात्तांतस्यैवांगत्वमिति भावः।।
।।६०।। परत्वादिति। ननु सार्वधातुकेशब्विधानात्कृत एव नियमे विकरण इति तयोर्विप्रतिषेधानुपपत्तिरिति चेन्न। अविशेषात्सामान्यशास्त्रेण ज
स्यायाद्वासुतिवादिषु कृतेषु पश्चान्नियमेन शुगादिनेव जातनिवृत्तिरित्याशयात्। तङ्विधानमित्यपपाठः। परस्मैपदविधानात्। स्येपीति। परत्वा
दिति भावः। न्यावादिभ्यस्त्विति। न्यावादीनां सर्वधातुकनिमित्तत्वादिति भावः। यदेति। इदं चिंत्यं। एकवाक्यतया विधिरिति पक्षे लादेशानामपि प्रकृ
तिविशेषापेक्षत्वेन सामान्यात्। अत्र पक्ष इति। दिग्योगलक्षणपंचम्यामित्यर्थः। भाविसंज्ञेति। तङानावित्यत्र चानशादिव्यावृत्तये लइत्यस्यानुवृत्त्या
रेकवाक्यतनयाविधिरिति पक्षे लस्थानेष्वपनिवृत्तेरिति भावः। एकवाक्यतयाविधिरितिशोषसिद्धांतपक्षं परिष्कृत्य विकरणेभ्य इति परिभाषाश्रयणप

१६ हंगौरवेणनिराकरोति।भिन्नेति।वैयर्थ्यापादनेनदूषणापत्तिंपरिहरति।शास्त्रानर्थक्यमिति।इतिगौरवमिति।एतस्यविहितानांभिन्नत्वेनान्व
यः।यद्यपिपूर्वस्मात्परंबलवदित्यतःपरान्नित्यंबलवदितिपठितुंयुक्तंतथापिपरंबलवदित्येतदपवादत्वादित्येतन्मध्येपठितं।।छ।।बीजमिति।
ननुन्यायादपिप्रत्यक्षशास्त्रस्यबलवत्त्वेनकथंपरान्नित्यादेर्बलवत्त्वमितिचेन्न।तुल्यबलयोर्विरोधस्यविप्रतिषेधशब्दार्थत्वात्।नित्यानित्ययोर
तुल्यबलत्वात्।तत्रनित्यस्यावश्यकतयांतरंगस्यज्ञापकादिनाऽपवादस्यचैवेनप्रामाण्याद्बाधकत्वेस्थितेतद्भिन्नोस्यविषयइत्याह।तुल्यबलेति।
शब्देंदुशेखरोक्तंत्वयुक्तमेव।शब्दांतरादीनामनन्यथासिद्धानिफलानिमृग्याणि।एतन्मूलकइति।कृताकृतप्रसंगीत्यत्रविशेषणनिवेशमूलक
मित्यर्थः।निमित्तमिति।प्रसंगमित्यर्थः।णौचङीति।अतएवेतिदोषः।तस्यचेच्छयान्यतरस्योभयस्यवानियामकत्वेनोक्तत्वादेवेत्यर्थः।।अ
तदसंगतिरिति।नन्वंतरंगत्वाच्चपादेशेपिपुनस्तिस्रादेशेनतत्त्वसंगतिरितिचेन्न।चपादेशवदंतरंगत्वान्नामीतिदीर्घेपश्चात्तिस्रादेशोलक्ष्येण
क्षणस्येतिन्यायेनपुनर्दीर्घाप्रवृत्तेः।एतेनेति।अंगशब्देनशब्दरूपनिमित्तस्यैवग्रहणेनेत्यर्थः।अपरनिमित्तकत्वेनेति।इदंपरनिमित्तकत्वेनस्या
दीनांबहिरंगत्वमिवक्ष्यमाणंचायुक्तं।प्रमाणाभावात्।भाष्यविरोधाच्चतथाहि।नामीतिसूत्रेआमीतिन्यासेनित्यत्वाद्दीर्घत्वमापादितं।तद्रीत्या १६

बहिरंगत्वात्तदसंगतिः।तथाऋतोभारद्वाजस्येत्यत्राचइत्यचोपदेशाग्रहणानपकर्षेजहर्षेत्यादौपरत्वाद्गुणेनजंतत्वात्प्रतिषेधोनप्राप्नोतीत्युक्तं।
तद्रीत्यागुणस्यबहिरंगत्वात्तदसंगतिरितिदिक्।यणाबाधितत्वादिति।ननुतदंतविधिपक्षेयणोबहिरंगस्यगुणेनैवबाधनात्तद्रूपमेतदितिचेन्न।तदं
तविधिभावकस्यएवैतस्यप्रवृत्तेः।यदुक्तंसिद्धांतइति।नन्वेवमपिप्रकृतासंगति।तदंतविधिमाश्रित्यप्रवृत्तप्रकृतभाष्याल्लब्धमितिचेन्नासंगतिस्ता
दवस्थादितिचेन्न।यणोगुणबाधकत्वानापत्तेर्हिनित्यत्वविघटनएवप्रकृतभाष्यतात्पर्यमित्याशयात्।सप्तम्याद्यंततयेति।नन्विदंरूपंप्रकृतभाष्या
ल्लब्धमितिचेन्न।यणोनिमित्तांशेऽधिकप्रवेशेगुणस्याप्युद्देश्यांशेऽधिकप्रवेशेनसाम्यापत्त्यांतरंगत्वोपपादनासंभवात्।इतितुनयुक्तमिति।वस्तुतस्त्विदमे
वयुक्तंज्ञापकंचात्रस्वरदीर्घयलोपेषिवित्यत्रलोपग्रहणं।तद्धितयोरित्यत्रवलोपे।स्थानिवत्वाभाववज्ञिलोपेतत्स्वरत्वेतुतयैवसिद्धेतद्वैयर्थ्यं।फलंपचेरि
त्यत्रयत्प्रवृत्तिः।अस्यपिपादेशस्यप्रकृतिप्रत्ययोभयापेक्षत्वेनबहिरंगत्वाल्लोपानापत्तिः।एवमसद्धूरित्यत्रोठो।सिद्धत्वाद्वलोपेन।नाजानंतर्यइत्य
स्यांतरंगेकृतइत्यर्थेमानाभावाद्गौरवंच।वलिलोपिजातबहिरंगत्वा।सिद्धत्वाभावस्यैवकल्पनात्।नतस्मिन्सूत्रस्थेतद्भाष्यविरोधः।ननुषट्संज्ञायांनलो
पासिद्धत्वस्यनफलमितिनलोपसुवितिसूत्रस्यभाष्यासंगतिः।बहिरंगासिद्धत्वाभावेनपंचेत्यत्रटाबारणायतदावश्यकत्वादतआह।पंचेत्यत्रेति।

१७ सामर्थ्येनेति। इदं चिंत्यं। प्रियपंचाशीपदीत्यत्र ङीपूङीपोर्निषेधायोक्तव्याख्यानस्यावश्यकत्वात्। व्याख्यानसामर्थ्येनार्थविशेषकल्पनायत्नस्याप्यदृष्ट
त्वाच्च। एतद्ध्वनयाम्येति। ननु त्रिपाद्यामंतरंगपरिभाषाया अप्रवृत्त्या कथमेतदिति चेन्न। नलोपः सुपि तिसूत्रे कृतिनुग्ग्रहणाभावेन लोपस्य तु क्विप्यसिद्धत्वाभा
भावे कर्तृकर्मणोर्लिङ्लोटाविति कथं बाध्यबाधकभावः। मैवं। भावेपि लिङ्लोटोर्विधानात्। कृत्यल्युट्ग्रहणमिति। ननु कथमेतद्दीर्घविधानार्थं
तयोरुपादानस्यावश्यकत्वादिति चेन्न। कर्त्तरि कृदित्यादौ नाकर्त्रीर्थ्यर्थसत्वेएव कृत्यन्तदसत्वेद्वृत्यत्रैव न तात्पर्येण दीर्घाधिको पि कर्तृरूपार्थस्य न
त्रमित्वान्नसिद्धेः। अनितं चेदं वासरूपोस्त्रियामित्यत्र भाष्यकैयटयोः॥छ॥ ननु श्वः पक्तेति। नन्वनद्यतनइति सूत्रे भाष्ये। नद्यतनइति योगं विभ
ज्य सदित्यनुवर्त्यानद्यतने लुटः सद्विधानेनानद्यतने भविष्यतिलुटमनुमाय श्वः सोमेन यक्ष्यमाणो। नद्यतने भविष्यतीत्यादयः प्रयोगाः। साधि
ताः। एवमेव भविष्यत्युपसंख्याता नां गम्यादीनां श्वो ग्रामं गमीत्यादावपि साधुता भविष्यति गम्यादयइत्यत्र भाष्यवार्त्तिककृद्भ्यामुक्ता तथा चा
यन्नुडिष्टएवेति चेन्न। योगविभागसिद्धस्य असार्वत्रिकतया प्रापिकेष्वेव तेन लुड नुमानात्। अत एवान्यत्र भाष्ये श्वोग्नीनाधास्यमानेनेत्याद
यः प्रयोगा अल्पपेन साधिता इति दिक्॥छ॥ नस्यादिति। समासास्त्रि प्रोत्तरपदेन विशेषणादिति भावः। नकुमारस्त्रादस्येति। पुंसि स्त्रियाः स्त्रियां

।त्रि॰।

॥३४॥ पुंस्त्वारोपेणानंतयोःसामानाधिकरण्यमनभिधानादितियुवाखलतीतिसूत्रेशब्दरत्नेस्पष्टं।नन्वेवमिति।ननुसामान्यरूपेणविशेष
रूपेणचेत्युक्तत्वाद्बहुव्रीहित्वस्यनद्विशेषणत्वादतिदेशेनसुलभोयंधर्मइतिकपंत्यांकोऽपीतिरितिचेन्न।विशेषरूपेणोत्पस्यानुपूर्व्याविशेष
रूपेणोत्पत्त्यर्थभ्रमिणलाभुस्थाप्यप्रातिपदिकव्याप्यार्थपरत्वेनसमाधानात्।विभक्ताविति।विषयसप्तमीयं।तेननगोश्वन्नितिविहितेविभक्ति
स्वरेपिप्रवर्त्तते।नांतरीयकतयेति।अंतरंगत्वाद्गोगडादिषुपरत्वात्सत्त्वविनार्थेवर्त्तते।अंतरभवमंतरीयंतत्रनञ्समासेकृतेष्टपोरगादित्वात्
प्यकारवचनप्रामाण्याद्दानलोपाभावःततःस्वार्थेकनितिभावइतिसूत्रेकैयटः॥ ॥ब्याघ्रीति।इदमुपलक्षणं।मासान्नपत्यभीक्ष्णामिति
बहुलमाभीक्ष्ण्यइतिणिनौकृतेयदिङीपिकृतेसुबंतेनसमासःस्यात्तदासमासांतदुकारइतिणत्वंनस्यात्।मासवापिणइत्यादावेवंतुसा
त।गर्गभगिनीत्यादावणत्ववारणायसमासरूपप्रातिपदिकांतनस्यैवणत्वविधानात्।एवंसांकुटिनमित्यादावभिविधौभावइत्तीनुणितताविभ
क्तिश्वप्राप्नोतिस्त्राणिनुणइत्यणचनत्रस्वार्थिकत्वेनांतरंगत्वाद्दण्स्यात्।ततश्चकुटिनित्यस्यैवांगत्वाद्वादिवृद्धिःस्यात्।प्राक्सुबुत्पत्तेःस
मासेत्वंतरंगत्वात्पूर्वंसमासः।अणप्रत्ययोहिप्रातिपदिकविशेषापेक्षत्वाद्बहिरंगः।तत्रसंकुटिनित्यस्मात्समासप्रातिपदिकादणप्रत्य ॥३५॥

येसतीष्टंसिध्यति।अतएवेति।कारकांशेबहुलग्रहणासिद्धत्वात्तत्किंत्वेकदेशानुमत्यैवसिद्धत्वादित्यर्थः।तदुभयप्रत्याख्यानमिति।
परेत्वचकारकग्रहणंकर्तृकरणइत्येतत्सूत्रविहितसमासमात्रविषयकं।कारकांशेबहुलग्रहणमूलकत्वात्।अस्यात्सदंशोवाचनिक
त्वेवानयैवकारिकयापचतिनरकमित्यस्यबाहुल्येनाकर्तृकरणइत्यत्रकृद्ग्रहणस्यबहुलग्रहणस्यचवैयर्थ्यं।ग्राममित्यस्यगमिन्शब्देनसमा
सेस्त्रियांग्रामगमिनीत्यत्रणत्वापत्तेश्च।अतएवसंबंधसामान्यषष्ठ्यंतस्यदेवदत्तेत्यस्यस्त्रीलिंगेमाषवापिन्शब्देनसमासेदेवदत्तमाषवा
पिनीत्यत्रप्रातिपदिकांतेतिणत्वंन।त्वद्रीत्यातुकृद्ग्रहणपरिभाषयामाषवापिन्शब्दस्यकृदंतत्वात्तड्डीबुत्पत्तेःपूर्वंषष्ठीसमासेसमासरूपप्राति
पदिकांतत्वान्नस्यणत्वापत्तिः।उपपदमितिसूत्रस्यभाष्यंतुत्वंवेवप्रतिकूलं।तथाहि।द्वयोःसमकालिकत्वमभिप्रेत्यवार्त्तिककृताषष्ठीसमासा
दुपपदसमासोविप्रतिषेधेनेतिवार्त्तिकेनविप्रतिषेधउपन्यस्तः।तदुक्तरंचनवाषष्ठीसमासस्याभावादुपपदसमासइतिवार्त्तिकेनचदूषि
तः।इदंचखंडनवार्त्तिकंभाष्यकृताद्विधाव्याख्यातं।तत्राद्यव्याख्यानंनवार्थोविप्रतिषेधेनकिंकारणंषष्ठीसमासस्याभावादुपपदसमासोभवि
ष्यतिगतिकारकोपपदानामिति।सुबुत्पत्तेःप्राक्समासवचनादिति।अंतरंगबहिरंगयोर्विप्रतिषेधायोगादितितत्रावैकपदआह।द्वितीयं

व्याख्यानमथवाविभाषाषष्ठीसमासःपदानषष्ठीसमासस्तदोपपदसमासोभविष्यतीति।प्रयोजनाभावात्प्रतिषेधोनपठितव्यइति
चतदाशयंकैयटआह।तथाचनवेत्यादिखंडनवार्त्तिकस्यैवायुक्तत्वात्प्रयोजनाभावाच्चविप्रतिषेधोनपठितव्यइत्यर्थद्वयमुक्तंभवति।नन्वं
तरंगयोर्विप्रतिषेधायोगस्यप्रथममुक्तस्यप्रत्याख्यानग्रंथोपिप्रतीयतइतिप्राहुः॥७॥७॥विन्नोऽप्यान्वयित्वमितिपाठः।प्रायइति।स्वकपा
लोघटश्चित्ररूपवान्लंबकर्णोबृहत्कुक्षिरित्यादिव्याहृतत्रयइदं।८॥नचहीति।दैकुञ्जिजिकइतिदीक्षितोक्तेत्वयुक्तमेवेतिभावः।परम
हृषदितिपाठः।सुदृषदितिपाठस्त्वयुक्तः।तत्राव्ययपूर्वपदप्रकृतिस्वरस्यैवेष्टत्वेनसमासांतोदात्तत्वस्यदुर्लभत्वात्।चच्छपीति।ननुऊढ
शिम्यांचङ्दुर्लभइतिचेन्न।ऊढग्राद्इत्यतोऽङीत्यनुवर्त्तमानेश्वयतेरइतिचङ्युपिस्यादित्यर्थात्।न्यायमूलेति।ङितिह्रस्वश्चेत्यस्यस्थानेवा
विह्रस्वश्चेत्येवसिद्धेवामीतिव्यर्थसदस्याज्ञापकमितिकेचित्।कृतितुग्ग्रहणात्परंपरयाबहिरंगस्यानाश्रयणाच्चेत्यमेतत्।यथाकथं
चिदिति।नाजानंतर्यइतिपरिमाणयातद्प्रवृत्तेरेवमुक्तिः।यथापूर्वंकेचिदित्यादिनातुग्विधावंतरंगपरिभाषायाअप्रवृत्त्याएवमुक्तेः।के
चिदिति।न्यायेमूलेत्यारभ्येतदंतःकेषांचिद्ग्रंथोबोध्यः।अजंतनपुंसकत्रोस्वरात्।परेतुकृन्मेजंतसूत्रेभाष्येआधयइत्यादावव्ययसंज्ञावा ॥३५॥

रणायानिकारोकारप्रकृतिरितिप्रवृत्तत्वंवार्त्तिकंसंनिपातपरिभाषयाप्रत्याख्यायकः।पुनरत्रविशेषः।एषापरिभाषाक्रियतेऽत्रनन्यप्रकृ
तिरितिवोक्तेनित्यविरोधमात्रांक्यावश्यमेषाकर्त्तव्याबहून्यस्याःप्रयोजनानिसंतीत्युक्तं।न्यायसिद्धत्वेऽविशेषात्रांकाकर्त्तव्येत्युक्तिश्चासंग
ता।किंचन्यायसिद्धत्वेविशेषणविशेष्यभावेष्येतत्वहृत्यापत्तेर्नप्रत्ययःसंनिपातलक्षणइतिभाष्यासंगतिः।अस्यैकदेशयुक्तित्वंतुविरोधी
भाष्यानराद्दृत्तेनाद्याधकाभावाच्चनयुक्तं।नचवर्णाश्रयइतिवार्त्तिकंप्रत्ययःसाक्षादेवनिमित्तंनेतिव्याख्यायनप्रत्यइत्यादिनोक्तव्याख्या
दृष्यपित्वांगसंज्ञाद्वारेणप्रत्ययोनिमित्तंनस्यादितिअभिप्रायेणांगसंज्ञातद्द्वनिमित्तंस्मादितिप्रकारांतरेणभाष्यकृतातद्व्याख्यातं।तत्र
त्रेवीगार्ग्यइत्यादावपितस्याजीपनिमित्तत्वानापत्त्यावर्णाश्रयइत्यस्यवैयर्थ्यंबाधकइतिवाच्यं।तद्वैयर्थ्यस्याग्रिमस्यांगसंज्ञेत्यादिस्तपा
तेपिनप्रत्यइत्यस्यैकदेशयुक्तित्वबीजाभावात्।वस्तुतोंगसंज्ञेत्यपिनैकदेशयुक्तिः।अंगसंज्ञाविधौयस्मादित्युपात्तंतत्रप्रत्ययविधौतदवधि
र्येनरूपेणोपात्तस्तेनरूपेणतस्यपरामर्शकं।अतएवभवतीत्यादौनदीर्घः।तथाचदाक्षिरित्यादौअदंतप्रकृतेःप्रत्ययस्यचानंतर्यमं
गसंज्ञानिमित्तंतच्चजीपेनन्नपत्तिविशिष्टप्रकृतेरानंतर्यनाशात्।शैवइत्यादौतुविशिष्टप्रकृतेरानंतर्यंनांगसंज्ञानिमित्तं।नचशैवइ

स्यादौप्रातिपदिकप्रत्यययोरानंतर्यमंगसंज्ञानिमित्तंतच्चलोपेननष्टमित्येवप्रातिपदिकत्वस्यतेननाशादितिवाच्यं।लौकिकैकदेशविकृत
न्यायस्याशास्त्रीयेपिप्रवृत्त्यानेनप्रातिपदिकत्वस्यसुलभत्वात्।यद्वागमन्यायस्यस्त्रीत्वापकार्येएवप्रवृत्तिरितिनुक्पुंकोरेतत्कार्यासंचारो
भाष्यकृतोक्तोनविरुद्धः।यद्वायदागमन्यायोनैतद्भाषाविषयकःकुन्मेजंतःसूत्रभाष्यात्।नन्वेवंद्वाभ्यामित्यत्रदृढेर्लोपस्यबलवत्त्वात्पूर्वंलो
पेऽदंतत्वाभावेनांगत्वाभावाद्धृस्वनापत्तिरितिवाच्यं।षष्ठ्यन्तस्यैवांगसंज्ञायामनुविधित्वाभावेनतत्सोपलभ्यात्।दृड्धीवन्मदस्यबालसं
ज्ञायांपच्छब्दस्याप्यमात्रोपस्थापकत्वाभावाच्च।ग्रामणिकुलमित्यादौतत्र्थ्याश्रयत्वेनहृस्वबहिरंगत्वेन।सिद्धत्वान्ननुक्।तिसृणामित्या
दौतुयादेशस्यापिविभक्तिविशेषापेक्षत्वेनबहिरंगत्वस्यसाम्यात्तिस्रादेशेनविप्रतिषेधोपपत्तिः।विशेषापेक्षस्यबहिरंगत्वंतुनुंयोगादिति
सूत्रेसांकुटिनमित्युदाहरणेभाष्यकैयटयोःस्पष्टं।षत्वतुकोरित्यत्रयथानतुग्ग्रहणवैयर्थ्यंतथोक्तंप्राक्।कृतितुग्ग्रहणंतुभाष्यकृताप्रत्या
ख्यातमेव।तुग्विधौपरिभाषायाःप्रवृत्तिज्ञापनेफलाभावाच्च।किंचविशेषणविशेष्यसंनिपातस्यापिग्रहणेग्रामणिच्छत्रमित्यत्रापितुक्
नस्यात्।हृस्वतुकोस्तत्रसाम्यंतुकःपदद्वयसंबंधिवर्णद्वयनिमित्तत्वात्।तत्तयनाचांतरंगपरिभाषोपतिष्ठते।पनुग्रामीतिसूत्रमस्याःपरिभा ॥३६॥

षायांज्ञापकमितिहरिदीक्षितेनोक्तंतन्न।मतिश्रीमाचेतिविग्रहेद्वंद्वेपिइतिपूर्वनिपातानापत्तेः।नलोपःसुबितिसूत्रभाष्यरीत्या
पूर्वप्रयोगेयस्यघित्वंतस्यपूर्वनिपातइत्यर्थेनात्रद्वंद्वप्रयोगेनदीत्वेनघित्वाभावात्।अंगाधिकाराभावेनप्रत्ययस्यनिमित्तत्वाभावात्।एव
मर्थस्यफलंपुत्रिहाविति।वस्तुतोयदागमन्यायेनापिसंनिपातविघाताभावमेषाहृनोज्ञापकंचात्रनतिस्त्रितिनिषेधः।अन्यथापरत्वात्ति
स्रादेशोसंनिपातपरिभाषयानुडोप्राप्तौतद्वैयर्थ्यं।एतदभिप्रेत्यकुन्मेजंतःसूत्रेप्रतिविधेयंशेषेध्वनितंसिद्धांतभाष्यव्याख्यावसरेक्रोपप
तीत्याकारांतभक्तःपुंवत्व्यवधायइत्युक्तंकैयटेन।नलोपःसुबितिसूत्रस्थेवत्रहृष्यामित्यादौसंनिपातपरिभाषयानुग्वारणपरंभाष्यंते
कटेनयुक्तिः।नपुंसकेबहुवचनेहस्वत्यत्रानपानुग्वारणासंभवेनकृतितुग्ग्रहणस्यावरूपकत्वात्।एतेनकृतितुग्ग्रहणात्तुग्विधौबहिरंगपरि
भाषानित्यपास्तंमाहृत्रहृच्चपुइत्याद्यर्थंतस्यावरूपकत्वात्।तेनप्रियपतिसृणीतानिकानिइत्यादौनुम्।तेषामित्यादौसुदूपचमानइत्यादौ
चनुमसिद्धिः।मुकुलंअधिजिगांसमानइत्यत्रशापंबाधित्वाचरितार्थः।एवंचग्रामणीत्यत्रसंनिपातपरिभाषायाअप्रवृत्तावंतरंगपरिभा
षैवनतवापिवारणमितिप्राहुः।स्वातिरिक्तस्येति।आत्तानीत्यादौस्वस्यस्वनिमित्तसंनिपातविघातकत्वेपिसामर्थ्यास्त्रवृत्तेरितिभावः।न

नुट्शतानीत्यत्र स्वनिमित्तभूतः संनिपातो ऽजंतस्य सर्वनामस्थानेनानंतर्यं। स च स्वेनैवापहृतः। नांतसर्वनामस्थानयोः संनिपातस्य
काविनाश्यः। स च ननु मो निमित्तमित्युक्तिरूपं संनिपातपरिभाषयाप्युक्तोवारणं। एवं श्रीपायेत्यत्रानयाकूपमालोपवारणं। एवं नदीत्या
दावनया संबुद्धिलोपाभावापादनं कृन्मेजंत सूत्रेकयंभाष्यकृता कृतं। नद्यंतांग संबुद्ध्योरानंतर्यस्य ह्रस्वेनविनाशित्वात्। ह्रस्वांतांग
संबुद्ध्योरानंतर्यस्य सुकाविनाशोपिस्वानिमित्तत्वात्। स्वसंपाद्यनिमित्तविघातस्य स्वयमनिमित्तमित्यर्थेनुभवतीत्यादावदेशस्यगु
णःताभ्यामित्यादौ दीर्घत्वं तमिसादीनां त्यदाद्यत्वकादेशादयोनिमित्तानि न स्युरितिमहोपप्लवः। दोषाः खल्वपि साकल्येन परिगणि
ताइति कृन्मेजंतसूत्रस्य भाष्यस्यदत्तजलांजलिताच। एवमाधयेकुंभकारेभ्य इत्यादौ गुणेत्वयोर्निमित्तभूतसंनिपातोघांतादंतविभ
क्त्योः स च सेनैवापहृत इति कपमियमुपतिष्ठतां इति चेन्न। श्रीपायेत्यत्र बहवः प्रकाराः प्रभाषामस्माभिः प्रदर्शिताः। नृतानिनदीत्या
दौतु अजंतविभक्त्योः संनिपातस्य सेनविनाशोपिस्वनिमित्तभूतांगविभक्त्योः संनिपातो ऽवशिष्यत एव नन्विदमंगमन्यदेवेति चेन्न।
शास्त्रीयाशास्त्रीयधर्मसाधारणाभ्यां यदागमेकदेशविकृतन्यायाभ्यां तत्प्रत्यभिज्ञानात्। न चैवं भवतिताभ्यामित्यादौ गुणदीर्घत्व ॥३७॥

दीन्यपि न स्युरिति वाच्यं। गुणादिषु कृतेष्वपि शास्त्रीयाशास्त्रीयकार्यसाधारणाभ्यां ताभ्यां स्वनिमित्तभूतसंनिपातसत्त्वविज्ञानेन
तद्विघाताभावात्। नदीशतानीत्यादौ नुट्लुग्लोपयोस्तद्विघातोस्त्येव। प्रत्ययलक्षणस्यशास्त्रीयएववप्रवृत्तेः। एकदेशविकृतन्यायेनापि
कृतावयवबुद्धेरभावात्। तथा च संनिपातलक्षणविधौ निमित्तभूतस्यानंतर्यस्य विघातेनतत्त्वतियोग्यनुयोगिनोरन्यतरस्यतद्विशेष
णयोर्वा निघातविधेः सोनिमित्तमित्यर्थ इतिदिक्। ननु तिसृ इत्यत्र प्रत्ययस्य साकल्येनापहारान्न लौकिकैकदेशविकृतन्यायावतार इति
कथमत्र परिभाषोपतिष्ठितामिति चेदत्रायं निष्कर्षः। अत्र संनिपातशब्देनानंतर्यमेव। उक्तयुक्तेः। स च स्वनिमित्तभूतः स्वसंपाद्यश्चाप
यस्वनिमित्तयोस्तत्वेन प्रत्यभिज्ञायमानयोश्च संपातितो ग्राह्यः। प्रत्यभिज्ञा च तत्स्थानिकतया वा लौकिकैकदेशविकृतन्यायेन वाद्य
दागमन्यायेन वा। न चाद्यस्योदाहरणं तिसृ रामायेति। स्वनिमित्तप्रत्ययप्रकृतिस्थानिकत्वात्। द्वितीयस्य तु नदीकुंभकारेभ्य इति।
तृतीयस्य शतानीति। तद्विघातकत्वं चानेकधा। कदाचिदानंतर्यमात्रस्य यथा याः साशाकटौपङ्क्तौ इत्येषेत्यादिक निरनुयोगिनः। यथा
नदीशतानीति। प्रतियोग्यनुयोगिनोरजसमुदाययोर्विघातश्च सर्वलोपात्मकएव। न विकारोनैकदेशलोपः। नेदमदसोरिति ज्ञापकात्

॥त्रि०॥
॥३९॥ उपन्यपैमिरित्यत्र भिस्त्वनिमित्तस्यत्यदाद्यत्वस्य तद्विघातकैस्त्वनिमित्तत्वाभावेनैसोऽप्रवृत्तिसिद्धावल्लैदपर्य्यं तेन भवति तैरित्यादौ गुणे
सादेशप्रवृत्तिः ननु यूयमित्यत्र जसः शीकस्मान्न भवति प्रकारप्रश्लेषादिति चेन्न पुनःप्रसंगविज्ञानात् छिन्नाग्लुग्विधयः कस्मान्न स
कृदिति न्यायाश्रयणात्तदिति भाष्यविरोधात् तस्मादनयैव परिभाषया सवारणीयः सचोक्तरीत्या न संभवतीति चेन्न शेषेलोप इत्यु
प इति पक्षाश्रयणात् पक्षद्वयस्यापि भाष्ये स्थितत्वात् शेषेलोप इति सूत्रस्थं शेषग्रहणं शक्यमकर्तुमिति भाष्यं तु निमित्तसमर्पकत्वा
षग्रहणाभिप्रायकं अत एव त्यदादीनामः इति सूत्रे टिलोपप्राप्त्यभावार्थं इति वार्त्तिकं संगच्छते अन्यथा नेदं त्यत्रापि ख्यभावानापत्तेः
एवमेव तुभ्यं त्वदित्यादौ मपर्यन्तादयः परिहर्त्तव्याः प्रतियोग्यनुयोगिनो रजरूपयोस्तयोर्यद्विशेषणे स्वरूपे तयोश्चतन्यात्र विकारान्वाए
वविघातः सच विशेषणयोस्तयोः प्रतियोग्यनुयोगिनोः सर्वविकरः अल्मात्र लोपस्य आद्यमतिजरणा निजरमित्यादिद्वित्वे यंगलियतस्या
द्वि अत्र यस्येति लोपाभावः अत्र बहुवचनेद्इति सूत्रे झलीति तद्विरामाणामित्यत्रैत्वाभावाय भारणातिपणेति जानातेरुपधाह्रस्वा
र्थमित्वं च तदभिप्रेत्य कन्मेजंतस्य सूत्रे भाष्ये एतत्परिभाषादोषेषु पुंकहस्वस्यस्वरदीदपतमतुविभक्त्युदात्तत्वं पूर्वनिघातस्य त्वग्निभाम्बरम ॥३९॥

वाचायादेशः सुपिचेति दीर्घत्वस्येत्युक्ताप्रतिविधेयं दोषेषि त्युक्तं अमुनेत्यत्र दीर्घस्त्वनना नाशब्देयत्कार्यं तत्र मुभावासिद्धत्वस्य
नमुन इत्यत्र भाष्यकृतोक्तेः एतत्परिभाषाफलत्वेनोपन्यसनपरं कन्मेजंतसूत्रस्थभाष्यं तु पूर्वपक्षिणः अतएवानेमुगिति सूत्रे भाष्ये
मुटि दीर्घत्वमापादितः दादेर्घोरिति सूत्रे च भाष्ये धांतदांतयोर्धत्वनत्वे आपाद्यपांत इति सिद्धांतितं तेन नैषादकर्षुक इत्यत्र ह्रस्वः जग्ध
मित्यत्र धत्वं उपष्टानामित्यत्र हलि विधायमान नमात्वं एधेतेत्यत्र गुणः कुमार्यै इत्यत्र यण श्रियै इत्यत्र यङ् सख्यावित्यत्र यणतेरित्यणुगुणः स
र्वेषामित्यत्र तं पराणामित्यत्रात्वं सज्जुः छंभुरित्यत्र छत्वं गवाग्र इत्यत्र दीर्घः अनडु नित्यत्र यणरामैरित्यत्र वृद्धिश्च सिद्धाति संनिपातप
रिभाषायाश्च नित्यत्वेन समाधानं तु विशिष्य तद्दोषगणनपरभाष्येण विशिष्यतद्दोषपरिहारोपायप्रदर्शनपरकैयटेन च विरुद्धं कार्द्धधा
तुकद्इति सूत्रस्थं उत्तेलोपे त्वस्वस्येति प्रयोजनपरं भाष्यं तु नित्यत्वस्यादेशात्पूर्वमतो लोपापत्तिः स्यादेशस्तु तस्येत्यत्रचरितार्थः उपचप्र
त्ययोपदेशो अकारांतत्वाभावेन लोपाप्राप्तेरित्यभिप्रायकमिति न तेनाप्यनित्यत्वे भर्त्याशाशाय एवतर्हि माश्रृदिति पूर्वभाष्यं तु उसिरूपसूत्रे
पागृह्णीदित्यादिसिद्धातस्मानुवर्त्यमित्यभिप्रायेण विधिश्चापूर्व एव तेन पपिवान्नित्यत्र लोपः सिद्धः तस्य नियमत्वेन विधित्वाभावात्कुतद्द

॥शि॥
॥३९॥ मिति चेद्धर्मिग्राहकमानादित्यवेहि। अस्यां च परिभाषायां नतिस्त्विति निषेधो ज्ञापकः। तच्च तित्रादित्रो विधिरेव। तस्माद्यान्वितस्यात्य
रिभाषायाः प्रयोजनानि तदर्थमेषा कर्त्तव्येत्युपसंहारभाष्ये कर्त्तव्येत्यक्तिरुक्तउक्तं निषेधेनानंतर्य विघातकांत्रोपरिभाषासिद्धावपि तत्त्वति
योग्यनुयोगितद्विघातकांत्रो। पूर्वेत्ताभिप्रायः। धर्मिग्राहकमानादेव चानंतर्यरूपएव सन्निपातः। अतएव द्वाक्षि गित्यादौ लोपसिद्धिः। प्रत्यय
स्यातत्याल्लात्। अंगसंज्ञायां तु यस्मादित्यनेनावधिमात्रपरामर्शेनितु प्रत्ययविधीयेन रूपेणोपादानं तेन रूपेणेति प्रतिविधेयमिति सिद्धं
तभाष्याभिप्रायः। धर्मिग्राहकमानादेव चत्रिपादीस्थस्य संनिपातविघातकस्य नैषाः प्रवर्त्तिका। तेन पंचानामित्यत्र नलोपः सिद्धः। एतेन
त्रिपाद्यामप्येषा प्रवर्त्तते। अनित्या चैषा। अनित्यत्वमपि परिगणितेष्वेवेति नयोक्तमपास्तं। जग्ध्वं सत्त्रूणं भुः पंचानां गवाग्रमित्यादौ परिग
णितातिरिक्तेपु उक्तरीत्या दोषापत्तेः। इत्यवइत्यादावनयैव परिभाषया णत्ववारणे कुप्वद्वायेति इति वार्त्तिकं वैयर्थ्यापत्तेश्च। दोषाः सा कस्मिन
परिगणिता इति भाष्यं तु पूर्वोक्तेषु दोषपरिहारोपायस्यानुक्तसाधारण्यात्त्रेपि परिगणितप्रायाइत्यभिप्रायं। सपरिहारोपायश्चास्माभिः प्र ॥३९॥
दर्शितः। केचित्तु वामीति धर्मिग्राहकमानादंगाधिकार एवैषेति तन्न। कुंभकारेभ्यइत्यत्राकजापत्तेर्बुद्धिवित्यत्र टाबापत्तेश्च। तस्य ज्ञापकतया

द्दूपित्तत्वाच्च। अनिमित्तमित्यत्र निमित्तत्वं च साक्षात्परंपरयापि यथा कथंचित्। अतएवोदुपधत्वमकित्वस्येति वार्त्तिकं संगच्छते। तत्रोदुप
धत्वशब्दे न तत्प्रयोजको नलोपो लक्ष्यते। उदुपधत्वस्य विधित्वाभावात्। स चोदुपधत्वसंपादनद्वारा कित्वस्य निमित्तं नेत्यर्थः। नन्वेवं पासित
त्रात्वमपि सुलोपनिमित्तं न स्यादिति चेन्न। संज्ञातिरिक्तशास्त्रविहितकार्यातिरिक्तधर्मद्वारैव निमित्तं नेत्यर्थ इत्यदोषात्। आत्वं कित्वस्यो
पादास्त्वेति वार्त्तिकोपपत्तेश्च संज्ञातिरिक्तेतीति दिक्। नाग्रहइति। इदंअंगसंज्ञातद्दीत्यकदेशयुक्तिरिति पूर्वग्रंथविरुद्धं निष्फलं च। जङ्नाभृ
दिति। नन्विदं कार्यकाजपक्षेपि प्रयोइत्रोवानाद्यः। तदुदाहरणेत्यादि समधानासंगतेः। अकृत निमित्ताश्रयत्वस्य परंपरयापि निमित्ताविघात
कत्वात्। नोत्यः। लुकं प्रतिगुणादेरनिमित्तत्वादिति चेन्न। निमित्तत्वस्य परंपरयाविवक्षितत्वेन लुकं प्रतिगुणस्य निमित्तत्वात्। इतोन्यत्रेति।
इदंगवाग्रमित्यत्र संनिपातपरिभाषाया अनित्यत्वाद्दीर्घ इति। अष्टानां पंचानामित्यत्रास्याअनित्यत्वादात्वादीति चत्राद्धेदुत्रोत्वरेण विरु
द्धं॥ ॥सन्निपात॥ ॥ध्याकृतकुगागमेति। अकारोऽविवक्षितइतिभावः। एतेन बिल्वएव बिल्वकस्तत्रभवो बैल्वकस्तस्मात्कीनाछेणोऽस्तु
गभावायत्वग्रहणमित्यपास्तं। बिल्वएव बिल्वकस्तस्मात्कीनाछेत्रेपि कृणिछस्यलुगभावायमृजोन्कार्यस्य षष्ठग्रहणेप्यावश्यकत्वात्। एकका

॥त्रि॰॥

॥५०॥ लिकत्वेति।कालशब्दाट्ठञि गमकत्वादेकशब्दस्य कालशब्देन समासे समकालिकत्वसाधुरिति भावः।न्यायसिद्धापीयमिति।सं
नियोगशिष्टानांसहैवप्रवृत्तिनिवृत्तीइतीयमित्यर्थः।अत एव आगस्त्यीयइतिसिद्धं।लुकिनिवृत्तेरागस्त्यादेशस्यापिनिवर्त्तनात्।
अत्रसंनियोगशिष्टत्वंचैकभवतिक्रियान्वयित्वं।तत्त्वावृध्यमानस्यापीतिबङ्कुयज्ञेत्यादौडीपिनिषिद्धेऽपिना।यत्रचशब्देनतत्रसोऽध्या
हर्त्तव्यः।अन्यतरापायेउभयोरप्यपायइतितुनन्यायलभ्यं।समुच्चयेसहप्रवृत्तेर्लोकेदर्शनेऽपितस्यादर्शनात्।इडविडमिति।इडविडो
पत्यंस्त्रीजनपदशब्दादित्यञ्।तस्यअतश्चेतिलुक्।दृष्टनिर्दिष्टस्यैवातिदेशाद्गुणवचनत्वाभावेऽस्मादिञोऽदर्शनान्नात्रपुंवद्भावइति
कैयटाशयः।अपत्यमेकोगुणोधनमेकोगुणइतिभाष्यंत्वेकदेश्युक्तिरितितुरूपप्रकरणेशेखरएवोक्तमित्यन्ये।सिद्धमिति।नचविधिशब्दो
भावसाधनोऽप्याश्रीयतइतिभावः।परंतुधर्मिग्राहकमानात्।लुग्विषयएवैषातेनऐनेयमितिसिद्धं।अतएवतान्त्रीपाकइत्यत्रसंप्रसा
रणनिवृत्तावपितीयस्यननिवृत्तिः।एवंहिफोल्लिरपिसिध्यति।एवंरयेयमित्यत्रैतस्यनिवृत्तावपिसिद्धं।नानयतेतिनिवृत्तिः।धिनोतीत्यत्र
चातोनिवृत्तावपिप्रत्ययइवृत्तिः।नह्यत्रभावसाधनविधिशब्दाश्रयणेननिर्वाहः।पूर्वस्यस्थितेरभावात्।किंचभावेपिविधिशब्दउत्तार ॥५०॥

नपरनस्थितिपरः।एतत्फलत्वेनभाष्योदाहृतेधिन्वंतीत्यत्रैवहउत्पाद्यत्वात्।आगस्त्यीयःवदयतीत्यादौतूक्तरीत्यासहैवप्रवृत्तिनि
वृत्त्योरंगीकारात्सिद्धं।ज्ञाननिवृत्तिस्तुज्ञापकसाध्यैव।अनयाचज्ञातनिवृत्तिबोधनद्वाराप्रकृतिस्थितिरेवबोध्यते।तेनपंचेंद्रइत्यत्राका
रस्यत्रिकमित्यत्ररिशब्दस्यचश्रवणंसिध्यतीत्याहुः॥७॥अतएवेति।ज्ञापकसिद्धत्वाभावादित्यर्थः।तस्मिन्द्वत्वेचलुग्विकरणस्यैवेतित्रा
पनेपिसूतिसूयत्योःपृथङ्निर्देशस्यसार्थक्यसंभवान्नपापिज्ञाप्यतइतिभावः।परंतुअलुग्विकरणत्वेनैवाग्रूपनविकरणत्वेनापिसाहचर्या
श्रयणसंभवात्कैयटोक्तंज्ञापकंसुस्थमेव।गातिस्थेतिसूत्रेपिवर्त्तेरितिवार्त्तिकंतुअस्तिर्भूभावेसिचोलुगर्थं।घुसाहचर्येणपरिच्छेदकन्या
याप्रवृत्तिरितिज्ञापकं।पाग्रहणेचापिपात्रसर्वत्रैवपाग्रहणेऽलुग्विकरणस्यग्रहणमितितत्रत्याख्यानभाष्यस्यतत्प्रमाणाशयः।घुमास्थेत्यत्र
पूर्वोत्तरसाहचर्येणालुग्विकरणस्यैवग्रहणापत्तिवारणायलुग्विकरणपरिभाषायाःसाहचर्यपरिभाषाबाधकत्वावश्यकत्वात्।घुसाह
चर्येपिलुग्विकरणपरिभाषाप्रवर्त्ततएव।अस्तेर्भूभावेतुनैषाधर्मिग्राहकमानेनादेशत्वानाक्रांतएवेतत्प्रवृत्तेः।अतएवोपान्त्यस्थादितिसूत्रे
अनयापरिभाषयानवसतेरेवग्रहणं।घटादौचपरिभाषाद्वयबलात्द्वयोर्ग्रहणमित्याहुः॥७॥प्रजिघापपिघन्ती।जिहननीपिबतीत्य

॥त्रि॥
॥४३॥ त्रकुत्ववारणायाभ्यासांगनिमित्तप्रत्यययोः कुत्वविधावेकत्वविज्ञानादितिभावः॥ ७॥ इदुपोरिति। इद्योरिकस्यडतरच्चामंज्ञापूर्वकं
ति। स्वंरूपंतपरं। अणुदितिदितिसंज्ञातिरिक्तसंज्ञेत्यर्थः। अस्वाधेवेति। बहुशिष्टप्रयोगान्महाकविप्रयोगाच्चष्टघोदरादित्वात्सा धुत्वंबो
ध्यमितितत्त्वं। समुदायस्येति। इदंतुनयुक्तं। निर्दिश्यमानपरिभाषयासमुदायस्यादेशप्राप्तेः। बिभेदेत्यादौनधात्विति निषेधस्तुनहलादिः
शेषइत्यत्रप्रत्ययाक्षेपेमानाभावात्। विस्तरेणैतत्पूर्वं निरूपितं। तर्कमूलेयमिति। तस्मिन्नित्यादिविषयेत्वनूद्यमानविशेषणेव्यवस्थापक
त्वेनचरितार्थायास्तद्विशेषणेनाव्यवस्थापकत्वमितितर्कमूलेत्यर्थः। भाष्योक्तरीत्येति। तत्रहिभस्येत्याक्षिप्तयजादिभिरनोविशेषणान्ना
नस्तस्योत्यत्रदोषइत्युक्तमितिभावः। क्रियाजनकार्थेति। तद्विशेषकर्त्राद्यर्थकेत्यर्थः। तत्त्वंचकर्तृत्वादिविशिष्टस्यतत्राभेदेनान्वयिनोवार्थस्य
वाचकत्वं। ननुनमस्यतिदेवानित्यत्रद्वितीयाचतुर्थ्योर्भिन्नार्थत्वसंप्रधारणायोगेनएकार्थत्वाच्चतुर्थ्यपिकारकविभक्तिःस्यात्रदृश्यतिक्रियाका
रकभावेनेतिचेन्नायस्मिन्शब्देयस्याःकारकार्थत्वंतस्मिन्नेवसत्यातंत्रेणप्रयुज्यमानेतस्यास्तदर्थकत्वेएवकारकविभक्तित्वंगौकारात्। प्र ॥४३॥
थमायाश्चाव्ययेषुकर्त्राद्यर्थकत्वाभावेपिवृक्षइत्यादौतिष्ठत्यादियोगेतदर्थकत्वमेव। चतुर्थ्यास्तुदरेयेनमइत्यत्रतस्मिन्नेवनमःशब्देनक

त्र्याद्यर्थकत्वमितिनकारकविभक्तित्वं। अनित्यमिति। ननुयस्यचतस्यणभविषयस्यचेतिसप्तमीत्वधिकरणेचापरेत्यर्थभेदाद्युगपन्नसंप्र
धारणमितिकथमेतदितिचेन्न। कथमपिकारकविभक्तिसंभवेउपपदविभक्तिर्नकर्त्तव्येत्यर्थेनादोषात्। अतएवोद्देश्यत्वमात्रविवक्षयादे
वायनमस्करोतीतिप्रयोगः। यत्किंचिक्रियेति। यथाराज्ञःपुरुषइत्यत्रपुरुषस्यराज्ञःस्वस्वामिभावोराजकर्मकसेवायांकृतक्रियाभावमू
लकः। अस्तिक्रिययाकर्तृत्वक्रियाभावस्कनतषेतिप्रथमैवेति॥ ७॥ तदर्थइति। अतएवबर्हिरुपधायाइत्यत्रोपधाग्रहणंचरितार्थं। इतराथव
धानइति। तेनचलीकृप्यनइत्यत्रद्वयोर्जत्वसिद्धिः। उदात्तनिर्दिष्टशादिति। तत्रहिनेतासोतामाषवापेरत्यादाविवनत्वप्रसंगात्वानिस्युः
ननुमसिंचतिमाषवापाणामित्यादावित्याशंक्यतत्रैषापरिभाषाइष्यतेतत्रोदात्तनिर्दिष्टाःकर्त्तव्यः। अनंत्यविकारेत्यस्यदेशस्यकार्यं
भवति। उदात्तनिर्दिष्टाइतिचपरिभाषापाठेत्युक्तं। इदमुपलक्षणं। एतदुत्तरमिदमपिप्रत्याख्याययत्रैवांत्यसदेशश्चानंत्यसदेशश्चैक
प्रयोगेयुगपत्समवस्थितौतत्रैवेत्युक्तेः। अंगावयवेति। अंगावयवश्चासोपञ्चादिपरश्चेतिकर्मधारयः। अन्यत्रविस्तरइति। परेतुनसंप्रसार
णइतिसूत्रेवार्त्तिककृदुक्तप्रयोजनानिश्च्क्षि श्रोणयेरेवान्यथा। भाष्यकृतासंसाधितानि। प्रतिविधेयंदोषिधितिभाष्यंत्वतिप्रसंगानांवा

॥शे०॥
॥४२॥ त्विकंकृदुक्तानांसुपरिहरत्वान्नत्रतावन्मात्रेणास्याश्चकर्त्तव्यतासिध्यतिकिंतुप्रयोजनाभावेनैवेत्यभिप्रायकं।अतएवनसंप्रसारणद्विति
सूत्रेनैतस्याःप्रयोजनानीतिफलाभावेनास्याअकर्त्तव्यताभाष्यकृतोक्ता।तत्रनतावन्मिमार्जिषतीतिप्रयोजनं।उरदत्वमित्यवानित्यत्वाच
बाधित्वाद्वृद्धेःहस्वेरूपसिद्धेः।अतोनरमित्येवृद्धिप्राप्तिस्तस्यानित्यत्वं।नचवृद्धिबाधित्वापरत्वाद्दृस्वः।अत्वस्यहस्वापवादत्वेनतद्विषयेएतत्प्र
वृत्तिपर्यंतंहस्वाप्रवृत्तेः।अभ्यासविकारेबाध्यबाधकभावोनेतितुसर्वसमावेशोतात्पर्यकंनन्यायप्रवृत्तिविघटकमित्युक्तंप्राक्।यद्याप्रतिप
दोक्तत्वाद्वृद्धिःतदाएदमिप्रेप्सास्कवृद्धिःअभ्यासहस्वेनसिध्यतीत्युक्तंभाष्येत्वन्मतेऽभ्यासस्यमुजित्वाभावाच्च।नाप्यदमुपद्धितिप्रयोजनं।तस्य
साधुत्वासंप्रतिपत्तेः।इतिभवितव्यमित्यत्रत्यातत्राप्रयुक्तत्वंसूचितंइतितत्रोरवरेत्वमाण्स्यासाधुतोक्तेश्च।अतएवष्यङइतिसूत्रेएतत्परिभाषा
प्रयोजनेषुनेतद्ग्रहणंतंवार्त्तिककृता।अतएवचादसोसेरितिसूत्रेऽदोत्रेत्यत्रमुत्ववारणायअःसेःसकारस्येतिव्याख्यापयद्धेवममुमुपद्धिति
नसिध्यति।अरघ्नद्धितिप्राप्नोतीत्युक्तंभाष्ये।यत्तुतदग्रेभाष्यंअनंत्यविकारेत्यसदेशास्यत्यदमुयद्धितिभवितव्यमितिर्त्तिकेत्वेदेशिनःएवमद
सोद्रेरितिश्लोकवार्त्तिकेपूर्वार्द्धमेवसिद्धांतयुक्तिः।एतदुत्तरंभाष्यंअनंत्यविकारेत्यसवार्त्तिककाराभ्यांसिद्धंतुसकारप्रतिषेधादित्यादिनाअ ॥४२॥

सेरितिप्रतिषेधएवोक्तः।तस्माच्चलीक्लृप्यतइतिवदमुमुयद्धित्येवसाधु।नचपूर्वार्द्धमेवैकदेशिनःउक्तिःकिंनेतिवाच्यं।नैतस्याः
प्रयोजनानीत्युक्तभाष्यविरोधात्।वार्त्तिककृताप्रयोजनेष्वपरिगणनाच्चेत्यवेहि।नाप्यनस्त्वक्ष्योत्पादिसिद्धिःफलं।यज्ञादिपरतया
न्कारंविशेषद्रष्यामइतिभाष्येएवपरिहृतत्वात्।अथांगांत्रोप्रत्ययस्योक्तिताकोक्षतयासोर्पोनोचितइतिचेन्न।भाष्यात्रायानव
बोधात्।प्रष्ठवाट्प्रष्ठौहःपरपदीर्घपाद्दुसुपदःपश्यपुवकुत्तःपन्नयेत्यादौऊठूपदभावसंप्रसारणानांपूर्वपदेऽप्रवृत्तयेपरिभाषाश्रय
णेप्ययमर्थोभाधिकारेण्यावश्यकइतिहिभगवतोभिप्रायः।नहीदमुक्तपरिभाषयानिर्वोढुंशक्यं।चलीक्लृप्यतइत्यनुरोधेनांत्यवर्ण
तद्वर्णयोरिनराव्यवधानएवेतत्प्रवृत्तेःकल्पितत्वात्।वस्तुतोनोपधायाइत्यादावुपधाग्रहणादंगाधिकारेप्रत्ययोंगस्यैवविशेषणं।उ
क्तभाष्यंतुपरिहारांतरोपलक्षणं।तथाहि।सचासाविषचेतिविग्रहेतदेषइत्यत्रतदस्तकारस्यसत्वमनंत्यविकारपरिभाषयानशक्यं
वारयितुं।अनंत्ययोरित्यक्त्वापरत्वेनापवादत्वेनचत्यदाद्यत्वात्पूर्वसत्वंवाच्यं।तत्रचोत्यवर्णतद्वर्णयोर्व्यवधानेनैतस्याअप्रवृत्तेःना
प्यक्लोपोनइत्यादाविवसावितितदोर्विशेषणमितिनिर्वाहः।तथासतिपेननाव्यवधानन्यायेनराभ्यामेवव्यवधानेप्रवृत्त्यापत्तेरस्य

।।त्रि०।।
।।४३।। इत्यत्र त्रिभिर्व्यवधानेतद्नापत्तेः। न च त्यदाद्यत्वोत्तरं पररूपे द्वाभ्यामेव वाच्यव्यवधानमिति वाच्यं। एवमप्यचः परस्मिन्निति पररूपस्य
स्थानिवत्वेन त्रिभिर्व्यवधानतादवस्थ्यात्। तस्मात्त्यदाद्यत्वं तस्यांगस्य तदो इत्यर्थे त्यदादेरेव निर्दिश्यमानत्वेन निर्दिश्यमानपरिभाष
या वा प्रत्यासत्त्या वा त्यदादिहितदोरेव सत्वमिति न दोष इत्यवश्यं सर्वैर्वाच्यं। तथा चैवमेवास्तु तस्यांगस्येत्यर्थे ऽनस्त्यत्वात्त्यादौ न दोषः।
किं चैतत्परिभाषाहरणेनोपधाया इत्यत्रोपधाग्रहणं वैयर्थ्यं। पंचानामित्यादौ पकाराकारस्य दीर्घवारणायोपधाग्रहणमिति तिरोस्वर
विरोधः। किं चैतत्परिव्यवधाने इति निर्देशोऽप्युक्तः। हंसन्नीरं सितदेषःउवष्ठनः इत्याद्यसंग्रहापत्तेः। अत एव वार्त्तिककृता विरुद्ध इत्येत
त्परिभाषाप्रयोजनेषु गणितं। तदनिर्देशे च लक्ष्यं तदित्यत्राभ्यासे लत्वाप्राप्तिरिति सिद्धयमुभयतः पाशारज्जुः। न चैतं नायणोऽवारि
दित्यत्रापि पित्त्वापत्तिः। एतत्प्रकरणे वृद्धिभाज एव प्रत्ययेन विशेष्यं तत्तद्गीतेत्यैवान्यत्रोक्तत्वात्। न चैतदानाय्यणो ह्रस्विष्विह इत्यादौ पूर्व
यणोऽपि स्थूलदूरेत्यादिना निवृत्त्यापत्तिः। स्थूलादिसाहचर्येण त्वाच्छमभिव्याहृत यणादेरेव नेन लोपविधानात्। यणाञ्जादेः परमिति
विग्रहेण यस्मात्यणश्चादेः पूर्वस्य गुणसंभवस्तस्मादेव लोपविधानादित्याहुः।।छ।। प्रधानस्त्रीत्वेति। स्त्रीत्वादेः प्राधान्यं चानायत्वात्प्र ।।४३।।

धानविशेषणत्वं बोध्यं। कुमारी वा चरन् ब्राह्मणः कुमारीत्यादौ नदीत्वार्थमवयवस्त्रीविषयत्वात्सिद्धमिति वार्त्तिकं तु यथोद्देशपक्षाभि
प्रायेण प्रवृत्तमिति न तद्विरोधः। यत्तु यूस्त्र्याख्याविति स्त्र्येषे खरेउक्तं प्राधान्येन स्त्रीत्वबोधकत्वनिवेशेन मानमिति एतद्वार्त्तिकं कार्यका
लपक्षेऽपि सुयोजमिति तदेतत्परिभाषाविरोधादयुक्तं। अन्यथा कुमारी वा तत्रमीशब्देऽपि नदीत्वापत्तिः। ननु एवं प्रियतिसृ इत्यत्र कपंतिस्रा
इत्यादिशः स्त्रीत्वस्याप्राधान्यादिति चेन्न। यं त्रावंत्र तिस्त्रीत्वे विशेषणं तद्विशेष्यगतत्वमेव तत्प्राधान्यं तच्चान्यत्रास्त्येव। पुमान् स्त्रियेत्यनेनो
पादीयमाने ब्राह्मण्यावितत्रांद्वेविशेष्यभूतेऽर्थे ब्राह्मणी लिंगीयात्वं स्त्रीत्वेन प्रवर्त्ततइति न कश्चिद्दोषः।।छ।। हेतुमतिचेत्यत्रेति। न च हि पाचयत्योदने
देवदत्तेनेत्यत्र गतिबुद्धीत्यस्य नियामकत्वं पानकर्मत्वमित्युक्तं। एतत्परिभाषाप्रयोजनं तु भूजेनोपदत्तां भुंक्ते इत्यत्रकरणे ति न तृतीया सिद्धिः। न च भी
ग्निभूजकस्यदंग्वानेगंतुमिच्छति च ग्रामादृएवान्वयः। ननु ग्रामं ग्रामायवा भोजनइत्यत्रगमेर्ग्रामः कर्म इषेस्तूभेकर्मणी इति भाष्येणेच्छांप्रत्यपि ग्रामस्य
कर्मत्वात्प्रधानानुरोधिकार्यस्य बलवत्त्वात्चतुर्थीबाधित्वा द्वितीयैव स्यादिति चेन्न। अपवादविषयेतन्न्यायाप्रवृत्तेरदोषात्।।छ।। तदनालिंगि
तेति। इदं पंकजशब्दे योगार्थबोधनिर्वाहाय। ननु स्वस्रादिषु मातृशब्दोऽनुकरणं न योगिकोऽपि रूढ इति चेन्न। अर्थवत्परिभोक्तीत्यागणप

॥त्रि०॥

॥४४॥ ङितेभ्योऽप्यर्थविशिष्टशब्दबोधांगीकारेणचतत्ररूढिजोपस्थितेः प्रतिबंधकतयायोगार्थस्यविशेषणतयायोगार्थस्यविशेषणतयाभा
नाभावेनादोषात्।रपकाराधिकरणेति।तत्रहिरथकारशब्देनयौगिकः किंतुरूढ्याजातिविशेषापरइत्युक्तं॥८३॥१०१॥विनाऽदेति।न
नुद्विवचनांतंतोविशेषोजेबरवद्दितःपक्षिवाचीसंभवतीतिकथंतस्माहचर्येणनिर्णयइतिचेन्न।उपात्तविकृतविशब्दसाहचर्य
स्यैवभाष्यकृदभिप्रेतत्वात्।बहुविजयतवनमित्यस्यानभिधानं अभिधानेवाप्राधान्येनस्वार्थबोधकस्यैवपराशब्दमाहचर्याद्भाष्य
प्रामाण्याद्ग्रहणं।तेनेति।नन्वेवमपिदीधीत्यत्रद्वयोर्ग्रहणापत्तिरितिचेन्न।क्वचिदसहचरितमात्रग्रहणस्यानित्यत्वज्ञापनेनविवक्षितत्वा
त्॥१०२॥नपुंसकत्वाभावादिति।नपुंसकग्रहणानुवृत्तिफलंतुनपुंसकसंज्ञाशब्दव्युदासः।अभिव्यक्तेतिन्यायानुसरणेगौरवप्रसंगान्न
पुंसकशब्दानुवृत्तिराश्रितातत्रार्थंच।ईच्चद्विवचनइत्यत्रनपुंसकस्येतिपुंवदितिचानुवर्त्तते।तेनछंदसिनपुंसकस्यपुंवद्भावान्मधोर्ग
ह्नातीत्यादौनुमभावसिद्धिः।इदमुपलक्षणंत्रिचतुरोरित्यस्य।स्पष्टंचेदम्इति।इयंचानित्याअनुपसर्जनाधिकारात्।तेनवनेरवेत्यादीनां
अतिधीवरीत्यादौप्रवृत्तिसिद्धिःबाधतइति।श्रुतेननिमित्तत्वेनैवलक्ष्येरेफःसंबध्नातीतिपरिभाषाक्षरसमन्वयइतिभावः।विस्तरइति। ॥४४॥

कार्यित्वनिमित्तत्वबोधिकयोःषष्ठीपंचम्योःश्रुतित्वाविशेषान्नानयाचनिर्वाहः।प्रातिपदिकांशेसामान्यविशेषभावस्योत्सर्गा
पवादभावोपपादकत्वेपिप्रकृतानुपयोगात्॥१०३॥लक्षणेनोक्तेति।लक्षणेनानुमानेनोक्तइत्यर्थः।प्रतिपदोक्तेत्यस्यविशिष्योक्तेत्यर्थःइ
दमेवेति।विलंबितोपस्थितिकत्वंशीघ्रोपस्थितिकत्वंचेत्यर्थः।अनित्याचेति।तेनभोभगोइत्यत्रवार्त्तिकनिष्पन्नानामपिग्रहणं॥७॥पित
मिति।दोदद्घोरित्यत्रघेटोनिवृत्त्यर्थंक्रियमाणंधाग्रहणंचघाग्रहणेःविषेज्ञापकं।नेदंदधातिनिवृत्त्यर्थं।दधातेर्घ्वादेशविधानात्।बाधि
केति।नत्वर्थंपत्परिभाषायाः।तेनप्रतिदायतीत्यत्रनणत्वं॥६॥एतदर्थमेवेति।वधादेशोआद्युदात्तनि।पातंनमित्यादिभाष्यंतुएकश्रुत्या
पाठमाश्रित्येतिनतदर्थमेतदितिभावः।वस्तुतःप्रत्नअभिभक्तावित्यत्रनिरनुनासिकोच्चारणस्वरायोहजात्पुत्तरापत्तयासामर्थ्याभावा
त्सानुनासिकवारणायभाव्यमानेत्यस्यानणसाधारण्यस्यगुणाभेदकत्वप्राप्तसाधारण्यस्यचावश्यकतयात्ततएवात्रनदोषः।भाष्यंत्विति।
भेदकपक्षाभिप्रायकंतंतुनयुक्तं।शांकाः।वृद्धिसंज्ञासूत्रेभाष्येःभेदकागुणाइत्येवन्याय्यमित्युक्तेः।इदूदेदित्यादिसूत्रस्थस्वरांतरसंग्रहायत
परकरणमित्यादिभाष्यंत्वेकदेश्युक्तिरितिभावः।अन्यत्रेति।पदादीनांसहस्वरितोदात्तानुदात्तोभयगुणकत्वयातदनुरूपेस्वरितेउच्चारणे।

मेउदात्तोच्चारणंविवक्षार्थंननुस्वरितस्यस्थान्यनुगुणत्वेपिफिषदितिसूत्रविरोधेनतदुच्चारणंयत्नएवस्यात्।अन्यथासमास
स्येतिशास्त्रविरोधेपिचतसर्याद्युदात्तोच्चारणरूपस्यस्थान्यननुगुणतयानयत्नत्वंस्यादितिचेन्न।तथचतसर्यतोच्चारणादुदात्तस्या
पिस्थान्यनुगुणतयानदुत्तानेनतुच्चारणाभावाद्युतोच्चारणंयत्नः।प्रकृतेतूदात्तस्यशास्त्रप्राप्तत्वेपिस्थान्यननुगुणतयातदुच्चारणंयत्नएव
वेत्याशयात्तत्रधर्मादेशेपिस्थान्यनुरूपेणोदात्तोच्चारणंविवक्षार्थं।ननुहंतेरेकाचोनाद्युदात्तत्वाद्यद्युदात्तवधुच्चारणंतदनुरूपमेवेतिचे
न्नावधेरपिस्थानिवत्वेनधातुतयाधातोरित्यंतोदात्तस्यैवोचिततयाद्याद्युदात्तोच्चारणस्यतदनुरूपत्वाभावात्।यद्वाफिषइत्यंतोदात्तेउ
च्चारयितव्येआद्युदात्तोच्चारणंविवक्षार्थं।यद्वाऽर्धधातुकविवक्षायामेववधिप्रवृत्त्यासतिशिष्टप्रत्ययस्वरेणवधेरनुदात्तत्वस्यैवोचितत
याउदात्तेउच्चारयितव्येतदुच्चारणंविवक्षार्थमितिभावः।नन्वेवमपिफिषइत्यंतोदात्तेउच्चारणीयेआद्युदात्तोच्चारणंविवक्षार्थंस्यादि
तिचेन्न।उपदेशोत्तरमेवेत्संज्ञालोपाभ्यामपहारेणज्ञापकपरभाष्यप्रामाण्येनचानुबंधेफिषइत्यस्याप्रवृत्तेः।नन्वेकश्रुत्यैवाष्टाध्यायीपा
ठेनतत्रतत्राद्युदात्तनिपातनंभाष्योक्तमसंगतमेवेत्याशयेनाह।संपूर्णेति।पदस्येति।ननुगुणानामभेदकतयाचैकस्वर्येणपाठेपिदोषाभावादेक ।।४५।।

श्रुत्यापाठाश्रयणंभाष्यकृतःकृतंव्यर्थमेवेतिचेन्न।एतदनाश्रित्यपरिहारांतरपरत्वेनादोषात्।इदंचिंत्यं।परिनिष्ठितेत्यत्रयुक्तोतोदात्त
त्वेनोपविधानेनेक्ष्वाकस्यानुदात्ततयाप्रक्रियायांकिंस्वरकस्यद्वंद्वघटकत्वेतिचिंतायाएतद्भाष्याभिप्रेतत्वेनचैकस्वर्येणैवेक्ष्वाकस्यपाठात्
ननुकाल्तिपक्षेपिदृढत्वनेनहस्वयोरपिनदीसंज्ञास्यात्दृढत्वादिजातेस्तत्रापिसत्त्वादतआह।पृष्ठेति।परेतुगुणाभेदकत्वप्राप्तस्याप्यप्रत्ययइ
त्यनेननिषेधस्यदादीनामइत्यादावुच्चारितस्वरस्यैवविवक्षापत्त्याद्विमुखेउदात्तस्येतच्छब्देचसंभवनधर्मणोहलःस्यानेअनुदात्तस्याकारस्या
नापत्तेः।नचानैकश्रुत्यापाठः।एवंविधेषुसर्वत्रैकश्रुत्यापाठस्यशापथैकनिर्णयत्वात्।एतत्प्राप्तस्यचाप्रत्ययइत्यनेनानिषेधेइदमित्राटाविव
नुनासिकात्वापत्तेःपररूपेणव्याचष्टुकामभविष्यतीतिचेन्न।अभ्यामित्यादौपररूपेणसानुनासिकापत्तेः।किंचाद्युदात्तइत्याद्युत्त्रोदात्त
ग्रहणंव्यर्थं।अनुबंधविनिर्मुक्तपदार्थोपस्थित्यापत्तेनाप्रत्ययइतिगुणाभेदकाइत्यस्यनिषेधेउदात्तोच्चारणेनैवनिर्वाहात्।किंचैवंसंयंतेत्या
दौसानुनासिकस्यदित्त्वार्थमणुदित्सवर्णस्यचाप्रत्ययइत्यणग्रहणमितिजणसूत्रस्थभाष्यविरोधः।गुणाभेदकत्वेनैवतस्यदित्त्वसिद्धेः।नचअणविषयेगुणा
नामभेदकत्वमेवेतिज्ञापनायाणग्रहणमितिवाच्यं।रत्नोक्तंयुक्तं।फलाभावात्।गुणाभेदकत्वप्राप्तस्याप्यप्रत्ययइत्यनेननिषेधेनघटवानित्यादौ

॥त्रि०॥

॥४६॥ सानुनासिकवकाराप्राप्तेः। किंचाष्टन आकारस्योत्तरार्थं निरनुनासिकत्वस्यावश्यकतया सामर्थ्याभावेनानया परिभाषया सानुना
सिकापत्तिः। न च पथिमथीत्यत्रोभयरोक्तरीत्या अप्रत्ययनिषेधोऽनण्यपीत्युक्तं तथा सति गोत इत्यादौ न परस्येत्यनेन ङिगुणाभेदका इत्यस्या
प्रत्यय इत्यनेन निषेधेन विवक्षासिद्धौ उदात्तग्रहणवैयर्थ्यापत्तेः। गोत इत्यादौ विवसमुदाये समुदायस्य सावर्ण्यसंभवात्। तस्माद्गुणाभेदका
इति स्वरमात्रविषयकं धर्मिग्राहकमानात्। गुणभेदकत्वं त्वानुनासिक्यमात्रविषयं। अणग्रहणात् धर्मिग्राहकमानात्। यद्यपि हृदिस
त्रेऽस्ति प्रयोजनमेतत्। किं तर्हि तेन भेदकत्वात्तद्गुणस्येत्यादिपूर्वपक्षभाष्यं भेदकत्वाभेदकत्वयोरपि स्वरानुनासिक्योभयविषयकं स्वरस्यतः
प्रतीयते। तथापि उभयमिदं गुणेषूक्तं भेदका अभेदका इति। किं पुनरत्र न्याय्यं अभेदका इति। कुत एतत्। यदयमस्यीत्युत्त्रोदात्तग्रहणं करो
तीति सिद्धांतभाष्यमुक्ताभिप्रायकमेव। अन्यथा हयवरट्सूत्रस्थभाष्यविरोधात्। पक्षाभेदका गुणा इत्यत्र गुणपदं स्वरानुनासिक्योभय
परं। हृदिसूत्रस्थभाष्यस्वरसात्। अभेदका गुणा इत्यत्र गुणपदं स्वरमात्रपरं। अयं पूर्वस्यापवादः। ननु हृदिसूत्रे सानुनासिकसंग्रहार्थं
परत्वावश्यकतया तद्दूषणेनासंदेहार्थं तकार तद् इति तत्सूत्रस्थभाष्यासंगतिरिति चेन्न। तस्य हृदिसंज्ञायां फलाभाव इत्याभाष्याभिप्रायात्। ॥४६॥

आनुनासिक्यं नाम गुणः तद्भिन्नस्यापि यथा स्यादिति भाष्यं तु फलाभावेऽपि गुणत्वमात्रेण तत्कीर्तनं युक्तमित्याशयेन सानुनासि
कस्याइं इत्र छत्तौ छंदसि न प्रयोगः। अप्रत्यय इति चा गुणानभेदकप्राप्तस्य निषेधो न वाणनणसाधारण इति न कश्चिद्दोषः। ज्या दृदिति
धर्मिग्राहकमानमपि अण्विषयकत्वेन वानुकूलं। अत एवाष्टन सूत्रे सानुनासिकत्वमाशंक्यानणत्वेन परिहार उक्तः। ननु गुणाभेदकत्वेन तदाशं
का। अप्रत्यय इत्यनेन तत्सिद्धावोक्तः। पथिमथ्यादेरपि तपरत्वेनैव सानुनासिकत्वमाशंकितं न तु गुणाभेदकत्वेनेति भावः। ॥७॥ पृषोदरादीनि ए
वंश्या वर्णागमोऽप्यत्रैव बोध्यः। ॥७॥ लोपेनेति। ननु वार्तिकात्पूर्वमेव सूत्रस्य प्रवृत्त्या कथं वार्तिकेन सूत्रवैयर्थ्यमिति चेन्न। वार्तिकस्य स्वैकवाक्यतया
लक्ष्यसाधुत्वनियामकत्वसंभवतीति न तद्वैयर्थ्यकल्पनमनुचितं इत्याशयात्। समासप्रकरणे भावि वार्तिकाद्यर्थस्यापि सूत्रकृदभिप्रेतत्वाच्च। आम
मेति। तेन सर्वेषामित्यत्र सुटि कृतेन पुनः सुड्भूयादित्यादौ तुस्यानिभेदात्पुनर्लोपः। एवं चात्र जसरूपपदेन साहचर्यात्कार्यभागे वा ग्रहणं तद्भवितरति तत्त्वं। ॥७॥ इदे
चेति। अनेन सिद्ध इति न्यायः। ॥१२०॥२३॥ ज्ञापकसिद्धमिति। तेन करस्य करभो बर्हिरिति सिद्धं। अपपरिबहिरिति भागे वा ग्रहणं तद्भवतीति तत्त्वं॥ ज्ञापकसिद्ध
पंचम्या अस्मार्थविकत्वात्। ज्ञापकेति। अहोर जद्धिरिति सूत्रेऽस्य बुग्रहणं ज्ञापकेऽस्यर्थः। ॥७॥ ॥७॥ एकस्या आकृतेरिति। दिवजो कप्रसिद्धेऽपंस्या

यः॥तथाहि खादिरे बध्नाति पलाशे बध्नातीत्यादौ विकल्पितेषु साधनेषु येनैव साधनेनोपक्रांता क्रियातेनैव निर्वाह्यते। तच्च यदि ख
दिरस्य कदाचिद्विशेषो भवति। तदा नतस्य द्वारा कर्तुः साहस्यात् खदिर एव प्रति निधीयते न तु पलाशः परिगृह्यते साधनभेदेन क्रिया
न्यत्वात्। उपक्रांतक्रियानिर्वाहाप्रसंगात्। लोकेपि यथा स्वस्वामिभावप्रतिपादनाय गवां स्वामी निषण्णु उपक्रम्यते। तदा चाश्वानां चेत्तत्रापि
तत्प्रतिपादनापसैव निर्वाह्यते। अन्यथाश्वेषु चेत्युक्तेऽधिकरणप्रतिपत्तिरपि स्यात्। अश्वेषु चेति प्रतीतिः। तस्मात् द्वितीयोर्थोपि यथा गवादाकृत्या प्रति
पादयितुमुपक्रांतस्तयैवासौ निर्वाह्यो न तत्त्वन्यथा न्याय्यात्तु द्वाकृत्या इत्यर्थः। एवं हि प्रतिपत्तिलाघवं भवति॥ छ॥ २८॥ निर्दिष्टं विशिष्टं द्वित्वमित्यादि॥
द्वित्वमेकाज्ग्रहणेन निर्दिष्टं। यङ्लुत्वं यथपूर्वं प्रवृत्तं तथा तत्त्वेनैव तस्य सिद्धे धातुत्वांशो नात्येति तोपयोगः। गुणो यङ्लुकोरिति। द्वित्वाप्रवृत्ता व
भ्यासाभावादेतद्वैयर्थ्यमिति बोध्यं। अत एवेति। अनित्यत्वेनैकाज्ग्रहणनिर्दिष्टद्वित्वादेः कतिपयस्य यङ्लुकि प्रवृत्तेरेवेत्यर्थः। पूर्वपक्षीयङ्
लुकीटइष्टत्वे दोषानुपन्यस्य न भाष्यं साधकत्वेनोपन्यस्य परोपन्यस्तं प्रमाणं दूषयति। यङ्लोप इत्यादीति। तथा च नेदमत्र प्रमाणमिति
भावः। अन्यथेति। एतत्परिभाषांगीकारे प्रकृतभाष्येति। अप्रमाणादेकाच इत्यर्थे न यङ्लोपे दोषवारणपरेत्यर्थः। इत्यादिस्थेति। यङ्लुक ॥४७॥

व्याहृत्यर्थं तु न तत्। तत्राम् प्रवृत्त्यासिद्धेरभावात्। केचित्तु बेभिदीत्यादौ चाकृतीत्यादौ च श्नम्प्राप्तोरभावायैषा परिभाषाश्रयणीया। आदादि
पाठेन बोभूतु चाकर्षीतीत्यादौ शपो लुक्यपि स्वस्वगणपाठस्याव्याहततया श्नमादेर्दुर्वारत्वात्। अजर्घा बेभिदीतितो निर्विकरणभाष्यप्रयोगे
पोषाध्वनितो। अत्रानुबंधेन निर्देशः स्वरूपेणैव विवक्षितः। न ङित इत्यारूपेण तेन नर्नर्तीतीत्यत्र नाभ्यासस्येति निषेधः। दाधर्तीतितिके
इति निषमार्थे। अत्रैवानुदात्तेत इति लक्षणमात्रेणैव पदं नान्यत्र यङ्लुकीति भाष्यं च नासंगतं। अनुदात्तङित इति सूत्रे स्वरूपेणानुबंधस्यानिर्देशो
न यङ्लुक्प्रकृतेः ज्ञापकं चात्र वा जुहोत्यादीनामिति वक्तव्ये प्रपंचो पासुपाह्वानमित्याहुः॥ छ॥ त्रीणि वर्त्ति। अष्टकस्येत्यखंडमिति भावः। अन्यद
णि माचागौरवं स्पष्टमेव। एकपदघटितमात्रागौरवविचारः स्येव। अपानामित्यत्र। एतेन षड्संज्ञायां रेफं पठित्वा षडुभ इत्यत्रानुनुर इति पठित्वा च
तुर्भ्यः षट्चतुर्भ्यो हलादिरित्यत्र च लुग्ग्रहणं व्यर्थमित्यपास्तं पदगौरवात्। प्रायेणेत्यस्य व्यावर्त्यमाह। स चिच्छिति। प्रायेणेतीति। उक्तमिति शेषः॥ ३०॥
अचानुक्ताः परिभाषादिक्प्रदर्शनाय आख्यायंते। मतिद्विष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः। उदाहरणानि स्फुटानि। इयं च न्यायसिद्धा। पश्चात्प्रवर्त
मानं न विधेकवाक्यतापन्नोदात्तमित्यनेन पूर्वस्वरनिवृत्तेः। अन्यत्रेति तु ज्ञापकसिद्धं। तास्यनुदात्तेदिति सूत्रे तासिग्रहणात्। तासिस्वरेण सतिशिष्टेन

॥४८॥ सार्वधातुकानुदात्तत्वसिद्धेस्तद्वैयर्थ्यं।यत्तुप्राचीनैर्विवक्षणंकृतंयच्चविकरणःस्वरभाक्तन्नैवान्यच्चेतिनिषेधः।यच्चतुविकरणांतरंतत्र
नापंधर्मिग्राहकमानात्।तेनदीव्यतइत्यत्रश्यन्स्वरएवेत्युक्तंतन्न।दाधाघ्वितिसूत्रस्थभाष्यविरोधात्।तत्रहिदैवादिकंतेबिदिवादौपश्यन्तद्
तुक्के।स्वरस्त्रसूत्रस्थभाष्यविरोधाच्च।तत्रहिश्वश्रूःस्वरेणश्यनःस्वरस्यबाधउक्तः॥१॥आगमाअनुदात्ताः।उदाहरणंतुविपीयेति।अत्रहिविशे
यु षविहितत्वात्परत्वाच्चपूर्वंसीयुटितनोप्यादेशप्रत्ययसंज्ञासंनियोगेनविधीयमानमाद्युदात्तत्वंसीयुटएवस्यादितीदं।आद्युदात्तश्चेत्यत्रभाष्येस्प
ष्टंषा॥२॥सोवर्यःसमम्पस्तदंतसनम्यः।अत्रचज्ञापकंभीह्रीतिसूत्रेप्रत्ययात्पूर्वंमिति।इयंचचतुरःन्नासीत्यत्रऊङिदमित्यंत्रैवचचतुर्थहे
णेकार्येचतुरःन्नासीत्यारंभसामर्थ्यात्॥३॥एकपदस्वरेप्रत्ययलक्षणंन।अत्रचज्ञापकंकनोनित्यत्वाच्छिद्धेसंज्ञायामुपमानमितिसूत्रेए
कपदेत्युक्तेर्देधतितिष्ठतीत्यत्रतिङ्ङतिङइतिनिघातसिद्धिरित्यन्यत्रविस्तरःनजुमतेत्यत्रभाष्येस्पष्टंस्थेषा॥४॥उत्तरपदत्वेचापदादिविधौप्र
त्ययलक्षणप्रतिषेधःवाचनिकोयं।तेनपरमवाचावित्यत्रनकुत्वं॥५॥विवक्षातःकारकविभक्तयोभवंतितेनाधिकरणत्वविवक्षायांग्रामे
गच्छतीत्यादिसिद्धमिति॥६॥छंदसिदृष्टानुविधिः।तेनसधावाविदस्माइतिसिद्धं।छंदोवत्सूत्राणि।तेनदधिरादैच्अचकुत्वेन।आसविशेषणानां ॥४८॥

इतिनिर्देशस्यविशेषणयोगेन।आद्याममनित्यसमासविषयेद्वितीयंतुनित्यसमासविषयं।तेनमहतःकुंभस्येपेतिन॥८॥विभज्यपदा
न्यन्वाख्यायंतेक्रमेणवा॥९॥संस्कृत्यपदान्युत्सृज्यंते।तच्चाद्यायथाजक्षं।अंत्याप्रायेणतथा।अनेकपदनिमित्तेनैकेनियतैव॥१०॥सापेक्षम
समर्थवत्॥११॥समानाधिकरणमसमर्थवत्॥१२॥एकादेशग्रास्वनिमित्तकस्यनषत्वं॥१३॥वृद्धिर्लोपोबलीयान्।अच्चचाग्लोपिनानेतिनिषे
धोज्ञापकः।तेनपटुमास्यदपपटदित्यत्रसन्वद्भावोनइदंचानित्यामहलिकल्योरिदंतत्वनिपातनात्॥१४॥नकर्मधारयान्मत्वर्थीयोबहुव्रीहिश्चे
दर्थप्रत्यायकः।इदंचानित्याअस्तुबद्धत्वइतिभाष्यप्रयोगात्॥१५॥णावचश्चादेशेन।ओःपितिसूत्रेयवर्गादिग्रहणात्॥१६॥उपधाह्रस्वोद्दितात्व
बलः।ओणेरुदित्करणात्॥१७॥कृत्तद्धितसमासेभ्यःसंबंधाभिधानंभावप्रत्ययेन॥१८॥गुणक्रियानिरूपितत्वात्।क्विःप्रधानत्वात्क्विवक्षात्।तेन
पत्त्यौदनोभुज्यतइत्यत्रनद्वितीया॥१९॥लक्ष्येलक्षणंसकृदेवप्रवर्तते॥२०॥उक्तार्थानामप्रयोगः।तेनक्रियाद्योत्यपौनःपुन्येयङितिनित्यवीप्सयोरिति
द्वित्वंन।न्यायसिद्धैषा।अर्थस्योक्तत्वेनपुनःप्रयोगवैयर्थ्यात्।इयंचानित्या।तेनद्वौब्राह्मणावित्यादिसिद्धिः॥२१॥विप्रतिषेधेआभीयासिद्धत्वेन॥२२॥
असतिबाधकेप्रमाणानांसामान्यपक्षपातः॥२३॥त्रिष्यमाणंजुप्यमानार्थाभिधायि॥२४॥प्रयुक्तानामन्वाख्यानंयथालक्षणमप्रयुक्ते॥तेनरचंती

॥त्रि०॥
॥४९॥ त्यादिना प्रयोगमूलकत्वाद्व्याकरणस्मृतेन्र्यायसिद्धैषा ॥१२५॥ जहत्स्वार्थावृत्तिरजहत्स्वार्था वा। जहत्स्वार्था तु तत्रैव रूढिर्यत्र विरोधिनी ॥ अं
त्या सर्वत्र ॥१२६॥ इयं कैपरिभाषेंदुशेखरेण विधार्यतां ॥ यत्त्रिपथगा विष्णुपदस्य कुसुमनःप्रिया ॥१॥ इति श्रीमन्नाघेवंशाचार्यकृतिप
रिभाषेंदुशेखरव्याख्या त्रिपथगा पूर्णतामगमत् ॥ ॥छ॥ श्रीसूर्यपुरवासीदवेनग्नीबसेकरसुतजीमशंकरेण लिखितं स्वेदं पुस्तकं ॥ ॥
यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ॥ यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥१॥ ॥छ॥ श्रीरस्तु ॥ शुभमस्तु ॥ कल्याणमस्तु ॥ श्री ॥

॥४९॥

॥त्रि॰॥
॥५०॥

॥त्रिपथगानाम्नीटीकापरिभाषेंदुशेखरस्यसमाप्तिमगमत्॥

॥५०॥